तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

# योऽनूचानः स नो महान्



दशमी कक्षाया:

## छात्राध्ययनसहायकसामग्री

सत्रम् - 2019-20


चेबिय्यं वेङ्कट रामय्य: ,प्र. स्ना. शि. - संस्कृतम्

केन्द्रीयविद्यालय: नं .1 (उप्पल्) हैदराबाद् , संभाग: |


www.maadurgawallpaper.com

तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

# छात्राध्ययन-सहायक-सामाग्री

## कक्षा - दशमी | संस्कृतम्

## हैदराबाद् – संभाग: |

## सत्रम् - 2019 – 2020


चेबिय्यं वेङ्कट रामय्य: ,प्र. स्ना. शि. - संस्कृतम्

केन्द्रीयविद्यालय: नं .1 (उप्पल्) हैदराबाद् , संभाग: |




# FORE WORD



It gives me immense pleasure to release the student's support studymaterialof class X in Sanskrit Language prepared by Mr. CH.Venkata Ramaiah TGT (Sanskrit) of KV NO.1 UPPAL,HYD.

I am sure that this material will cater to the needs of our students and support them to overcome stress and strain during Board exam.

As our Hon'ble Prime Minister Shri Narendra Modi is conducting debate on 'PARIKSHA PE CHARCHA – 2020' in order to reduce exam stress, I hope this student's support study material will contribute a lot towards relieving stress among the students.

On this occasion I appreciate the efforts of Mr.Ch.Venkata Ramaiah TGT (Sanskrit) of this Vidyalaya for his contribution for the benefit of the students of class X . I strongly believe this study material will help the board class students.

छात्राध्यायनसामग्रीं पठित्वा दशमी कक्षाया: संस्कृतच्छात्रा: लाभान्विता: भवेयु: इति आशास्यते|

Date : 20-01-2020

PRINCIPAL
(P SRINIVAS RAJU)
KV No1 UPPAL
HYDERABAD

पुरोवाक्

श्री मात्रे नम: |

महानयं प्रमोदस्य विषय: यत् " बालानां सुखबोधाय " विशिष्य दशमी कक्षाया: छात्राणां कृते संरचितेयं छात्राध्यायनसहायकसामग्री CBS E संस्थाया: पाठ्यक्रमानुसारं , प्रश्नपत्रम् आधृत्य सरलशैल्या विरचितेयं अध्ययनसामग्री |अपठितावबोधनम् , रचनात्मककार्यम् , अनुप्रयुक्त-व्याकरणम् , पठितावबोधनम् च इति चतुर्भि: खण्डै: प्रश्नपत्रम् विलसति | अत्र न केवलं प्रश्नोत्तराणि , अपितु अभ्यासार्थं प्रश्ना: अपि प्रदत्ता: | अस्यां सहायकसामग्र्यां प्रत्येकस्य प्रश्नस्य उत्तरं कथं लेखनीयम् इत्यपि संसूचितम् | अत्र व्याकरणबिन्दूनामुपरि विशेषावधानं प्रदत्तम् | दशमी कक्षाया: छात्रेभ्य: इयं सहायकसामाग्री कल्पतरुरिववांछितफलप्राप्त्यै सहकरोतीति संभाव्यते |अवसरेऽस्मिन् अस्या: सामग्र्या: प्रणेतारं प्रियमित्रम् अस्माकं संस्कृतविभागेअन्यतमं प्रशिक्षित-स्नातक-शिक्षकं श्रीमन्तं चेबिय्यं वेंकटरामय्य महोदयं आशीर्भि: समतोषयितुं भगवन्तं हनूमन्तं संप्रार्थये |

दिनांक: :- 20. 01 . 2020 .

बुधजनविधेय:
डॉ.चिलुकूरि दुर्गाराव:
प्रशिक्षित-स्नातक-शिक्षक:
के.वि.नं-1, उप्पल् , हैद्राबाद्|

*******************

कर्मणैव जयति पुरुष:

ॐ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति |
तस्याहं न प्रणश्यामि स च मे न प्रणष्श्यति || गीता.6.30||

अस्मिन् संसारे कियन्त: मानवा: सन्ति ये जायन्ते मृत्युं च प्राप्य परलोकं गच्छन्ति |परन्तु कति जना: सन्ति ये तेषां विषये जानन्ति ? सम्भवत: अत्यल्पा: एव | यतोहि लोक:सर्वदा कर्मयोगिनाम् एव स्मरणं करोति |गीतायां श्रीकृष्णेन अस्मादेव कारणात् पूर्वमेवकथितं यत् – " योग: कर्मसु कौशलम् " इति | कक्षा दशमया: छात्राणां कृते सहायकाध्ययन-सामग्र्या: निर्माणं स्वयमेव कठिनं कार्यं भवत्येव | परन्तु कार्यमिदं निर्विघ्नं परिसमाप्य श्री रामय्या महोदय: " कर्मणैव जयति पुरुष: " इति वचनम् अन्वर्थमकरोत् | श्री वेंकट रामय्य महोदयस्य कठिनतरपरिश्रमेण दृढसंकल्पेन च एव अस्य बालहितकार्यस्य समापनंकृतमस्ति | अस्या: सहायकसामाग्र्या: निर्माणार्थं महोदयाय अहं धन्यवादान् ज्ञापयामि | अस्या: सामग्र्या: मुखपत्रस्य निर्माणं मया कृतमस्ति | मुखपत्रे अंकितं सुभाषितं विशेषरूपेण बालानां कृते एव योजितम् अस्ति |मूलसुभाषितम् अस्ति महाभारतस्य शल्यपर्वणि यथाहि -

" न हायनैर्न पलितै: न वित्तेन न बन्धुभि: |
ऋषयश्चक्रिरे धर्मं योऽनूचान: स नो महान् ||

ऋषिप्रोक्त: परम्पराप्राप्त: अनूचान: सनातन: धर्म एव अस्माकं महान् अस्ति | यश्च निरन्तराभ्यासेन अध्ययनेनैव प्राप्तुं शक्य: |यतोहि बालानां धर्मोऽपि निरन्तराध्ययनशीलता एवास्ति | अत: अहं चिन्तयामि यत् बालै: स्वाध्यायधर्मस्य पालनेन स्वमातृ –पितृ – गुरूणां मस्तकं गर्वेण गौरवोन्मुखं करणीयम् | उपरि लिखित: " यो मां पश्यति ......." इत्यादि गीताश्लोक: अमूमेवार्थं द्योतयति यत् भक्तिभावयुक्त: भक्त: यथा सर्वत्र ईश्वरमेव पश्यति तथैव छात्रा: स्वज्ञानपिपासां शमयितुं विद्याभ्यासेन अर्जुन इव लक्ष्यैकायत्ता: भवेयु: इति |

20.01.2020

पङ्कज सिन्ह:
प्रशिक्षित-स्नातक-शिक्षक:
केन्द्रीय विद्यालय: , करनाल:
गुरुग्राम सम्भाग:

# PREFACE

I would like to thank our Principal Sri. P.SRINIVASA RAJU garu for his support and encouragement to prepare student's support study material in Sanskrit of class X.

Based on the Principle-"Known to unknown" this student support material is framed to help the students in rememberingthe facts and frame correct sentences based on some rules designed in the book.

In this regard I followed CBSE syllabus and Exam pattern – 2020. It is an insight after a few years of experience to make the support material as per CBSE Question paper pattern. In each question five points have been followed:

1. Learning points and their explanation in simple, brief and scientific manner.
2. Examples for explained points.
3. Some related questions for practice.
4. Answers to the given questions.
5. Some questions to practice on their own based on the explanation of learning points.

Index has been prepared as per CBSE X – syllabus and Exam pattern – 2020. This part reflects the entire content very vividly.

Lesson wise unsolved few questions based on question numbers 12.गद्यांश:,13.पद्यांश: 14. नाट्यांश: 15. प्रश्ननिर्माणम् 16. अन्वय: 17. घटनाक्रमानुसार-लेखनम् &

18. उचित-शब्दार्थै: सह मेलनम् have been added.

I hope this Sanskrit study support material for class X will be useful to the students for securing full marks.

I thank Dr.Ch Durga Rao TGT (Sanskrit), KV No.1 Uppal, Hyd for his timely suggestions in preparing this material and for his foreword and I also thank Mr. Pankaj Singh TGT Sanskrit, KV Karnal, Gurugram region, who prepared cover page and blessed students in his foreword and sent some text based practice questions.

Mr.Ch.Venkata Ramaiah

T.G.T. (Sanskrit)

दिनांक: :- 20.01.2020

KVNo 1, UPPAL

Hyderabad Region.

KVS

# विषयसूची

## पाठ्यक्रम: C B S E प्रश्नपत्रप्रारूपम् च |

| खण्ड: | प्रश्न संख्या | विषय: | प्रश्नप्रकारा: | अंका: | पृष्ट-संख्या |
|---|---|---|---|---|---|
| क | | अपठित-अवबोधनम् | | 10 | |
| | 1 | अपठित-गद्यांश: \| 80–100 शब्दपरिमित: \|<br>**भाषिकम्**– कर्तृ-क्रियाचयनम् ; कर्तृ-क्रिया-अन्विति: ;<br>विशेषण-विशेष्य-चयनम् ; पर्याय-विलोमपद-चयनम् \| | I. एकपदेन उत्तरत<br>II.पूर्णवाक्येन उत्तरत<br>III. शीर्षकम्<br>IV. भाषिक-कार्यम् | 2<br>4<br>1<br>3 | 8 |
| ख | | रचनात्मकं कार्यम् | | 15 | |
| | 2 | पत्रलेखनम् | मञ्जूषात: पदानि चित्वा रिक्तस्थानपूर्ति: | 5 | 12 |
| | 3 | चित्रवर्णनम् | निबन्धात्मक: | 5 | 15 |
| | 4 | अनुवाद: ( हिन्दी/आंग्ल–वाक्यानां संस्कृतेन अनुवाद:) | पूर्णवाक्यात्मक: | 5 | 17 |
| ग | | अनुप्रयुक्त-व्याकरणम् | | 25 | |
| | | शेमुषी –द्वितीयभाग-पुस्तक-आधारितम् | | | 21 |
| | 5 | सन्धिकार्यम्<br>*व्यञ्जनसन्धि: :- तुगागम: ; मोऽनुस्वार: ;<br>वर्गीय-प्रथमाक्षराणांतृतीयवर्णे परिवर्तनम् ;<br>वर्गीय-प्रथमवर्णस्य तृतीयवर्णे परिवर्तनम् ( 2 )<br>*विसर्गसन्धि: :- विसर्गस्य उत्वम् , रत्वम् ,<br>विसर्गलोप: ; विसर्गस्थाने स् , श् , ष् ( 2 ) | लघूत्तरात्मका: | 4 | 21 |
| | 6 | समास: :- वाक्येषु समस्तपदानां विग्रह:<br>विग्रहपदानां समास: -<br>*तत्पुरुष: - विभक्ति: - 1<br>*बहुव्रीहि: - 1<br>*अव्ययीभाव: -(अनु,उप, सह ,निर्,प्रति,यथा ) - 1<br>*द्वन्द्व: - 1 | बहुविकल्पात्मका: | 4 | 24 |
| | 7 | प्रत्यया: :-<br>*तद्धिता: - मतुप् ,ठक् ,त्व ,तल् - 3<br>*स्त्रीप्रत्ययौ – टाप् ,ङीप् - 1 | बहुविक्कल्पात्मका: | 4 | 29 |
| | 8 | वाच्यपरिवर्तनम् –केवलं लट् लकारे<br>(कर्तृ,कर्म,क्रिया)-3 | बहुविकल्पात्मका: | 3 | 31 |
| | 9 | समय: -<br>अंकानां स्थाने शब्देषु समयलेखनम्<br>(सामान्य ,सपाद ,सार्ध ,पादोन ) - 4 | लघूत्तरात्मका: | 4 | 33 |
| | 10 | अव्ययपदानि– उच्चै: , च , श्व: , ह्य: , अद्य ,अत्र-तत्र ,<br>यत्र-कुत्र , इदानीम् , अधुना , सम्प्रति ,<br>साम्प्रतम् , यदा , तदा ,कदा , सहसा , वृथा ,<br>शनै: , अपि , कुत: , इतस्तत: , यदि-तर्हि \| | लघूत्तरात्मका: | 3 | 35 |

| | | | | | |
|---|---|---|---|---|---|
| | | | | | |
| | 11 | संशोधनकार्यम् लिंग-विभक्ति-वचन-लकार-पुरुष-दृष्ट्या ) | बहुविकल्पात्मका: | 3 | 36 |
| घ | | पठित-अवबोधनम् | | 30 | |
| | 12 | गद्यांश: पठित-गद्यांशम् अधिकृत्य अवबोधनात्मकम् कार्यम् \| | I. एकपदेन उत्तरत<br>II. पूर्णवाक्येन उत्तरत<br>III. भाषिक-कार्यम् | 1<br>1<br>3 | 38 |
| | 13 | पद्यांश: पठित-पद्यांशम् अधिकृत्य अवबोधनात्मकम् कार्यम् \| | I. एकपदेन उत्तरत<br>II. पूर्णवाक्येन उत्तरत<br>III. भाषिक-कार्यम् | 1<br>1<br>3 | 39 |
| | 14 | नाट्यांश: पठित-नाट्यांशम् अधिकृत्य अवबोधनात्मकम् कार्यम् \| | I. एकपदेन उत्तरत<br>II. पूर्णवाक्येन उत्तरत<br>III. भाषिक-कार्यम् | 1<br>1<br>3 | 40 |
| | 15 | प्रश्ननिर्माणम् | पूर्णवाक्यात्मका: | 4 | 41 |
| | 16 | अन्वय: / भावार्थ: | पूर्णवाक्यात्मका: | 4 | 43 |
| | 17 | घटनाक्रमानुसारम् कथालेखनम् | पूर्णवाक्यात्मका: | 4 | 45 |
| | 18 | पर्यायमेलनम् / विलोमपदानां मेलनम् अथवा वाक्येषु प्रयोग: \| ( पाठान् आधृत्य लघूत्तरात्मका: प्रश्ना: ) | लघूत्तरात्मका: | 3 | 46 |

## पाठ्य –पुस्तकम् –“ शेमुषी – संस्कृत-पाठ्यपुस्तकम् द्वितीय: भाग: (दशमश्रेण्यै)

( घ – खण्डस्य ( पठितावबोधनम् ) अभ्यासार्थं केचन प्रश्ना: अत्र दत्ता: )

| पाठसंख्या | पाठनाम | विषय: | पृष्टसंख्या |
|---|---|---|---|
| प्रथम: पाठ: | शुचिपर्यावरणम् | पद्यात्मक: | 48 |
| द्वितीय: पाठ: | बुद्धिर्बलवती | चम्पू | 48 |
| तृतीय: पाठ: | व्यायाम: सर्वदा पथ्य: | पद्यात्मक: | 50 |
| चतुर्थ: पाठ: | शिशुलालनम् | नाट्यांश: | 50 |
| पञ्चम: पाठ: | जननी तुल्यवत्सला | गद्यात्मक: | 51 |
| षष्ठ: पाठ; | सुभाषितानि | पद्यात्मक: | 51 |
| सप्तम: पाठ: | सौहार्दं प्रकृते: शोभा | नाट्यांश: | 52 |
| अष्टम: पाठ: | विचित्र: साक्षी | गद्यात्मक: | 52 |
| नवम: पाठ: | सूक्तय: | पद्यात्मक: | 54 |
| दशम: पाठ: | भूकम्पविभीषिका | गद्यात्मक: | 54 |
| एकादश: पाठ: | प्राणेभ्योऽपि प्रिय: सुहृत् | नाट्यात्मक: | 54 |
| द्वादश: पाठ: | अन्योक्त: | पद्यात्मक: | 55 |

# केन्द्रीय विद्यालय: नं – 1 , उप्पल् , हैदराबाद् – 39 |

कक्षा :- दशमी | अंका: - 80 |

विषय: - संस्कृतम् | समय: - घण्टात्रयम् |

## C.B.S.E.– 2019 - 2020 प्रारूप-प्रश्नपत्र-आधारेण परीक्षायै पाठ्य-सामग्री |

| | | | | |
|---|---|---|---|---|
| प्रश्नपत्रस्वरूपम् :- | खण्ड: - क | : | अपठित-अवबोधनम् | 10 अंका: |
| | खण्ड: - ख | : | रचनात्मककार्यम् | 15 अंका: |
| | खण्ड: - ग | : | अनुप्रयुक्तव्याकरणम् | 25 अंका: |
| | खण्ड: - घ | : | पठित-अवबोधनम् | 30 अंका: |

एतस्मिन् प्रश्नपत्रे सर्वेषां प्रश्नानाम् उत्तरलेखनाय प्रश्नवाचक-पदानाम् लिंग , विभक्ति , वचन आधारेण एव उत्तरलेखनं कथं सरलं भवतीति संस्कृतस्य सांकेतिकत्वाधारेण ज्ञातुं प्रयत्नम् कुर्म: | प्रत्येकस्मिन् प्रश्ने सरल-उत्तर-लेखनाय आवश्यकतानुसारम् C B S E द्वारा निर्धारित-पाठ्यबिन्दूनां अवगमनाय सामान्य – शब्दरूप , धातुरूप , अव्ययपद , प्रत्यान्तपदादीनाम् सरलरूपेण विवरणम् दत्तम् |

**अध्ययन-सहायक-सामग्रीम् कथं अवगन्तव्यं पठनीयं च ?**

**सम्पूर्णप्रश्नपत्रे प्रत्येकस्मिन् प्रश्ने एष: क्रम एव आधृत: :-**

1. प्रश्नस्य पाठ्यबिन्दूनां विवरणम् |किं किं पठनीयम् ? इति विषयाधारेण क्रियते |
2. विवरणानुसारम् उदाहरणानि |
3. अभ्यासार्थं प्रश्ना: |
4. उत्तराणि |
5. परीक्षायै अभ्यासप्रश्ना: |

### क – खण्ड: ( अपठित – अवबोधनम् ) – 10

**Q.1. अधोलिखित -अनुच्छेदं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत -**

**अनुच्छेद:**

**I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2**

अत्र उत्तरलेखनाय अधोलिखित-पाठ्यबिन्दून् स्मरत |

**पाठ्यबिन्दूनां विवरणम् :-**

**अपठित–गद्यांश– ज्ञानाय पठनसमये एव कर्तृ- कर्म - अन्यकारकविभक्ति , उपपद – विभक्ति, विशेष्य-विशेषण , समानार्थकपद , विलोमपद , अव्यय , प्रत्ययान्त , क्रिया पदानाम् अनुवाद: करणीय: |अनया दृष्ट्या गद्यांश-अवबोधाय किं करणीयम् ? अत्र तु शब्दरूपाणाम् धातुरूपाणाम् उपर्युक्त-अन्यपदानाम् ज्ञानेण एव भवति |गद्यांश–आधारित– प्रश्नानां शुद्धोत्तरलेखनाय प्रश्नवाचक - पदानाम् अभ्यास: करणीय: |पश्याम तावत् :-**

**I. एकपदेन उत्तरत -**

1. अस्मिन् प्रश्ने प्रश्नवाचकपदम् किम् ? इति प्रथमं चिन्तयन्तु |
2. प्रश्ने अन्यपदानि अनुच्छेदस्य कस्मिन् वाक्ये सन्ति इति अवगच्छन्तु |
   तस्मिन् वाक्ये प्रश्नवाचकपदस्य लिंग-विभक्ति-वचनानुसारम् यत् पदम् अस्ति,
   तदेव उत्तरम् भवति |
3. प्रश्न-वाचक-पदानि कति विधानि / प्रकारेषु / रूपेषु भवन्ति ?इति पश्यन्तु

कण्ठस्थीकरणञ्चकुर्वन्तु |

**क) किम्–पुंल्लिंगशब्दरूपाणि -**

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | क: | कौ | के |
| द्वितीया | कं | कौ | कान् |
| तृतीया | केन | काभ्याम् | कै: |
| चतुर्थी | कस्मै | काभ्याम् | केभ्य: |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्य: |
| षष्ठी | कस्य | कयो: | केषाम् |
| सप्तमी | कस्मिन् | कयो: | केषु |

**किम्- नपुंसकलिंग-रूपाणि -**

| | | | |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |

तृतीयात: रूपाणि **"किम्" –पुंल्लिंग**-शब्दरूपाणि इव भवन्ति |

**किम् – स्त्रीलिंग-शब्दरूपाणि-**

| | | | |
|---|---|---|---|
| प्रथमा | का | के | का: |
| द्वितीया | कां | के | का: |
| तृतीया | कया | काभ्याम् | काभि: |
| चतुर्थी | कस्यै | काभ्याम् | काभ्य: |
| पञ्चमी | कस्या: | काभ्याम् | काभ्य: |
| षष्ठी | कस्या: | कयो: | कासाम् |
| सप्तमी | कस्याम् | कयो: | कासु |

**ख) कीदृश**– प्रश्नवाचकपदस्य रूपाणि त्रिषु लिंगेषु भवन्ति | उत्तरम् विशेषणपदं भवति | पश्याम: :-

बालकवत् यथा प्रथमा **कीदृश:** **कीदृशौ** **कीदृशा:**

यथा - **<u>परिश्रमी</u>** छात्र: सफलतां प्राप्नोति | **<u>कीदृश:</u>** छात्र: सफलतां प्राप्नोति ?

**<u>परिश्रमिणौ</u>**छात्रौ सफलतां प्राप्नुत: | **<u>कीदृशौ</u>** छात्रौ सफलतां प्राप्नुत:?

**<u>परिश्रमिण:</u>**छात्रा: सफलतां प्राप्नुवन्ति | **<u>कीदृशा:</u>**छात्रा: सफलतां प्राप्नुवन्ति ?

पुष्पवत् यथा प्रथमा **कीदृशम्** **कीदृशे** **कीदृशानि**

यथा - उद्याने **<u>सुन्दराणि</u>** पुष्पाणि शोभन्ते | उद्याने **<u>कीदृशानि</u>** पुष्पाणि शोभन्ते ?

नदीवत् यथा प्रथमा **कीदृशी** **कीदृश्यौ** **कीदृश्य:**

यथा - **<u>बुद्धिमती</u>** बालिका विचार्य कार्यं करोति |**<u>कीदृशी</u>** बालिका विचार्य कार्यं करोति ?

**ग) सप्त-ककारा:** :-

| | अव्ययानि | | अर्थ: | उत्तरम् ( कथम् भवति ) |
|---|---|---|---|---|
| 1) | कुत्र | = | कहां | स्थलम् ( द्वितीया / सप्तमी )( विद्यालयम् / विद्यालये ) |
| 2) | कुत: | = | कहां से | पञ्चमी / मूलशब्द +त: ( विद्यालयात् / विद्यालयत: ) |
| 3) | किमर्थम् | = | क्यों | चतुर्थी / मूलशब्द+अर्थम् ( धनाय / धनार्थम् ) |
| 4) | कति | = | कितने | संख्या |
| 5) | कथम् | = | कैसा | तृतीया / विशेषणपदम् |
| 6) | कदा | = | कब | समय: ( प्रात: / मासे / रात्रौ / ..... ) |
| 7) | किम् | = | क्या | एकस्मिन् पदे / वाक्ये |

यथा

1) छात्र: **<u>कुत्र</u>** पठति ? - छात्र: **<u>विद्यालये</u>** पठति |

छात्र: **<u>कुत्र</u>** गच्छति ? - छात्र: **<u>विद्यालयं</u>** गच्छति |

2) फलानि **<u>कुत:</u>** पतन्ति ? - फलानि **<u>वृक्षात् / वृक्षत</u>**: पतन्ति |

3) श्रमिक: **<u>किमर्थम्</u>** कार्यम् करोति ? -श्रमिक: **<u>धनार्थम् / धनाय</u>** कार्यम् करोति

4) कक्षायां **<u>कति</u>** छात्रा: दृश्यन्ते ? - कक्षायां **<u>पञ्चत्रिंशत्</u>** छात्रा: दृश्यन्ते |

5) बाहुबली इति चलनचित्रम् **<u>कथम्</u>** अस्ति ? - बाहुबली इति चलनचित्रम् **<u>सम्यक्</u>** अस्ति |

छात्र: **<u>कथं</u>** विद्यालयं आगच्छति ? - छात्र: **<u>कार्-यानेन</u>** विद्यालयं आगच्छति|

6) कोकिल: **<u>कदा</u>** कूजति ? - कोकिल: **<u>वसन्ते</u>/ वसन्त-काले**कूजति |

7) स: **<u>किं</u>** चिन्तयति ? - स: **<u>“ इदानीम् अहं किं करोमि ?”</u>** इति चिन्तयति |

---

**II. पूर्णवाक्येन उत्तरत –** **( केवलं प्रश्नद्वयम् )** **2x2=4**

**( उपरि किम् , कीदृश ,शब्दरूपाणि तथा सप्त-ककारा: दत्ता: |तेषाम् आधारेण उत्तराणि लिखन्तु )**

**III. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत – ( द्वित्रिशब्दात्मक-शीर्षकम् ) 1**

**( अनुच्छेदात् विषयाधारितम् “प्रथमा ” –विभक्ति पदम् /**

**“ षष्ठी विभक्ति तथा प्रथमा विभक्ति ” – युक्तपदे लिखत )**

**IV. यथानिर्देशम् उत्तरत -** **( केवलं प्रश्नत्रयम् )** **1 x 3 = 3**

**भाषिक-कार्यम् :-** **यथा :-**

***** कर्तृपदम् / क्रियापदम् किम् ? राम: गच्छति | कर्तृपदम् – राम: , क्रिया-गच्छति |

* विशेष्यपदम् / विशेषणपदम् किम् ? सुन्दरं वनम् | विशेषण-सुन्दरं , विशेष्य – वनम् |

*समानार्थकपदम् / विलोमपादम् किम् ? सन्तोष: = आनन्द: , सुखम् x दु:खम् |

**भाषिक-प्रश्नानाम् उत्तर- लेखनाय** प्रदत्ते प्रश्ने एव सहायकपदं भवति , तदाधारेण उत्तरंलिंग , विभक्ति ,वचन , अनुसारं प्रदत्त-विकल्पेभ्य: चित्वा लिखन्तु |

---

**Q. अभ्यासार्थम् अनुच्छेद: :-**

यद्यपि अस्मिन् संसारे बहूनि वस्तूनि सन्ति , परं विद्या एव सर्वश्रेष्टं धनम् अस्ति | विद्यया मानव: विनयशील: भवति | विनयात् असौ पात्रतां प्राप्नोति , पात्रत्वात् स: धनं प्राप्नोति | धनाद् धर्मं कृत्वा एव स: सुखं लभते | सुप्रतिष्ठिते कुले समुत्पन्न: रूपयौवनसम्पन्न: जन: अपि यदि विद्यया हीन: भवति तदा समाजे स: सम्मानं न प्राप्नोति | विद्यया एव स: सर्वविधं ज्ञानं प्राप्य आत्मन: समाजस्य च उत्थानं करोति , लोके धनं कीर्तिंच प्राप्नोति |

विद्या मानवस्य मातेव रक्षां करोति , पितेव हिते नियोजयति | विद्या वस्तुत: कल्पलताविद्यते | अन्यत् धनं व्यये कृते क्षयं प्राप्नोति , परं विद्याधनं व्यये कृते वर्धते | अत: सत्यमेव उक्तम् – “ विद्याधनं सर्वधनप्रधानम् ” |

**I. एकपदेन उत्तरत -** **(केवलं प्रश्नद्वयम् ) 1 x2=2**

i. मानव: कथं विनयशील: भवति ?

ii. मानव: कस्मात् पात्रतां प्राप्नोति ?

iii. विद्याधनं कथं वर्धते ?

**II. पूर्णवाक्येन उत्तरत –** **( केवलं प्रश्नद्वयम् )2x2=4**

i. मानव: विद्यया कयो: उत्थानं करोति ?

ii. मानव: कदा सम्मानं न प्राप्नोति ?

iii. विद्या पितेव किं करोति ?

**III. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत – ( द्वित्रिशब्दात्मक-शीर्षकम् ) 1**

**IV. यथानिर्देशम् उत्तरत -** **( केवलं प्रश्नत्रयम् )** **1 x 3 = 3**

**i. अनुच्छेदे “ दु:खम् ” इति पदस्य विलोमपदं किं प्रयुक्तम् ?**

**क) धनं ख) सुखं ग) क्षयं घ) परं**

KVS

ii. " लभते " इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

क) विनयं ख) विद्या ग) स: घ) हीन:

iii. " विनयशील: " इति विशेषणपदस्य विशेष्यपदं किम् अस्ति ?

क) मानव: ख) समुत्पन्न: ग) हीन: घ) जन:

iv. " पात्रतां " इत्यस्मिन् पदे क: प्रत्यय: प्रयुक्त: ?

क) त्व ख) ठक् ग) तल् घ) मतुप्

**************************************

**उत्तराणि :-**

शुद्ध-उत्तर-लेखनाय :-**उपरि Q.1. पाठ्यबिन्दूनां विवरणं स्मरत |**

* प्रदते प्रश्ने प्रश्नवाचकपदस्य लिंग –विभक्ति –वचन – अनुसारम् एव उत्तरं लेखनीयम् |

* प्रदत्ते प्रश्ने सहायकपदस्य / पदानाम् आधारेण एव उत्तरं लेखनीयम् |

तालिका-माध्यमेन कथम् उत्तरं लेखनीयम् इति पश्याम: -

| प्रश्न-सं | प्रश्न-वाचक पदम् | मूलशब्द: / अव्ययम् / सहायक – पदम् | लिंग: | विभक्ति: | वचनम् | अनुच्छेदे उत्तर-युक्त – वाक्यम् \| ( सहायकपदम् ) | उत्तरम् |
|---|---|---|---|---|---|---|---|
| I. i | कथं | अव्यय | 0 | 0 | 0 | **विद्यया** मानव: विनयशील: भवति \| | **विद्यया** |
| ii | कस्मात् | किम् | पुं | पं | एक | **विनयात्** असौ पात्रतां प्राप्नोति | **विनयात्** |
| iii | कथं | अव्यय | 0 | 0 | 0 | विद्याधनं **व्यये कृते** वर्धते | **व्यये कृते** |
| II.i | कयो: | किम् | पुं | ष | द्वि | विद्यया एव स: सर्वविधं ज्ञानं प्राप्य **आत्मन:समाजस्य च** उत्थानं करोति | ................ **आत्मन:समाजस्य च** .............. \| |
| ii | कदा | अव्यय | 0 | 0 | 0 | सुप्रतिष्ठिते कुले समुत्पन्न: रूपयौवनसम्पन्न: जन: अपि **यदि विद्यया हीन: भवति तदा** समाजे स: सम्मानं न प्राप्नोति \| | ...............**यदि विद्यया हीन: भवति तदा** ........................\| |
| iii | किं | अव्यय | 0 | 0 | 0 | पितेव **हिते नियोजयति** | **हिते नियोजयति\|** |
| III | किम् | शीर्षकम् | | | | **" विद्याधनं सर्वधनप्रधानम् "** | **" विद्याधनंम् " / " सर्वधनप्रधानम् "** |
| IV.i | किम् | विलोम पदम् | | | | धनाद् धर्मं कृत्वा एव स: ..... **सुखं** लभते | **X सुखं** |
| Ii | किम् | कर्तृ पदम् | | | | धनाद् धर्मं कृत्वा एव **स:** सुखं लभते | **स:** |
| Iii | किम् | विशेष्य पदम् | | | | विद्यया **मानव:** विनयशील: भवति \| | **मानव:** |
| Iv | क: | प्रत्यय: | | | | **" पात्रतां "** | See Q.No - 7 पात्र + **तल्** (प्रत्यय: ) |

**************************************

**अभ्यासाय** :- अधोलिखितं अनुच्छेदं पठित्वा प्रश्नानाम् उतराणि लिखत -

समयो हि अन्येषां वस्तूनां अपेक्षया अधिकः महत्वपूर्णः मूल्यवान् च वर्तते अन्यानि विनष्टानि पुनरपि लब्धुं शक्यन्ते परं समयो विनष्टो न केनापि उपायेन पुनः परावर्तयितुं शक्यते। जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति - व्यर्थयापनेन अकार्यकरणेन च। अनेके जनाः कार्यसम्पादने समर्थाः अपि निरर्थकं समयं यापयन्ति इतस्ततः भ्रमन्ति च |अप्रयोजनाः भूत्वा गृहे - गृहे अटन्ति। ते तु स्वार्थाय न च परार्थाय कि किञ्चित् कार्यं कुर्वन्ति। न धर्मम् आचरन्ति , न धनम् उपार्जयन्ति , तेषाम् जन्म निरर्थकं भवति। भूमिरपि एतादृशानां निष्क्रियाणाम् भारं वोढुं नेच्छति। ईदृशा जनाः कस्मै अपि न रोचन्ते न वा कश्चित् तेभ्यः आश्रयमेव दातुमिच्छाति। ते यत्र-तत्र गच्छन्ति ततः एव बहिष्क्रियन्ते। पितरौ अपि एतादृशान् तनयान् न अभिनन्दतः। अतः अस्माभिः आलस्यं विहाय सर्वदैव समयस्य सदुपयोगः कर्तव्यः।

I. एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

- i) पितरौ एतादृशान् कान् नाभिनन्दतः ?
- ii) का निष्क्रियाणाम् भारं वोढुम् नेच्छति ?
- iii) जनाः निरर्थकं कं यापयन्ति ?

II. पूर्णवाक्येन उतरत – ( केवलं प्रश्नद्वयम् ) 2 x 2 = 4

- i) अन्येषां वस्तूनाम् अपेक्षया समयः किमर्थं अधिकः महत्वपूर्णः मूल्यवान् च भवति ?
- ii) केषां जन्म निरर्थकं भवति ?
- iii) अस्माभिः कः कर्तव्यः ?

III. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत | 1 x 1 = 1

IV. निर्देशानुसारं प्रश्नानाम् उत्तराणि प्रदत्त-विकल्पेभ्यः चित्वा लिखत 1 x 3 = 3

i) **'अनेके जनाः'** इत्यत्र विशेष्यपदं किम् ?
क) पितरौ ख) जनाः ग) अनेके

ii) **'सदुपयोगः'** इत्यस्य विलोमपदं किम् ?
क) उपयोगः ख) आलस्यं ग) दुरुपयोगः

iii) **'पुत्रान्'** इत्यस्य पर्यायपदं गद्यांशत् चित्वा लिखत।
क) जनान् ख) तनयान् ग) परार्थाय

iv) **'अभिनन्दतः'** इति क्रियापपदस्य कर्तृपदं किम् ?
क) पितरौ कौ) अनेके ग) जनाः

*******************************************************************************************

# ख – खण्डः ( रचनात्मकम् कार्यम् ) 15

**Q.2. पत्रलेखनम् |** मञ्जूषातः उचितम् पदम् चित्वा पत्रे रिक्तस्थानानि पूरयत – **½x 10 = 5**

**पाठ्यबिन्दूनां विवरणम् :- पत्रपूरणार्थम् ध्यातव्याः विषयाः** / पत्रस्य स्वरूपम् :-

पत्रे रिक्तस्थानपूर्तिः कथं करणीया ? मञ्जूषाधारितपदानां अवबोध एव प्रधानः भवति |पश्यत -

* मञ्जूषायां दत्तानां पदानां लिंग-विभक्ति-वचन-पुरुष-अव्यय-प्रत्ययान्त पदानां अवबोधः / विभागः भवतु | अनन्तरं पत्रे प्रदत्त - रिक्तस्थानेषु उत्तर- लेखनाय अधः प्रदत्त - 16 सहायकविषयाणां ज्ञानेन मञ्जूषातः शुद्धम् उत्तरं चित्वा लिखत |

* प्रत्येकस्मिन् वाक्ये रिक्तस्थानात् पूर्वम् / परं यत् पदं भवति तत् पदम् एव उत्तरस्य कृते सहायकपदं भवति | तेन सहायकपदाधारेण मञ्जूषातः लिंग-विभक्ति-वचनानुसारम् शुद्धमुत्तरं चित्वा लिखत |

* वाक्यानि कर्तृ-वाच्ये /कर्मवाच्ये भवन्ति | अतः तदनुसारम् एव मञ्जूषातःउत्तरपदस्य चयनम् / लेखनं भवतु |

**पश्यामः तावत् अधः 16 सहायकविषयाः उत्तरलेखने कथम् उपकुर्वन्तिइति :-**

**उदाहरणानि :-** रिक्तस्थानस्य विषय: **उत्तरम्**

1. क: पत्रम् लिखति ? / भवान् क: ? — रमेश: / सरेश: ........
2. कुत: लिखति ? — हैदराबाद्त: / दिल्लीत: / काशीत: / चेन्नैत: .........
3. कं लिखति ? — पितरम् / मित्रम् / प्रधानाचार्यम् ......
4. कथम् सम्बोधयति ? — आदरणीया : पितृपादा: / प्रिय मित्र रमेश ! / सुरेश ! .....
5. कथम् नमस्कारम् करोति ? — सादरम् प्रणामा: / सप्रेम नम: / नमो नम: .......
6. कथं प्रारम्भ: क्रियते ? — अत्र कुशलम् | तत्रास्तु | तव पत्रम् प्राप्तम् | अहं दशम-कक्षाया: छात्र:अस्मि |
7. विषय-प्रस्तुतीकरणम् : - ( अध: वाक्येषु दत्तानि पदानि रिक्तस्थानानि इति चिन्तयन्तु | एतानि पदानि उत्तरपदानि सूचयन्ति |)
8. कर्तृपदम् .................... .................... ...................... |
9. ............. ..................... .............................. क्रियापदम् |
10. ............. कर्मपदम् ...................... ......................... |
11. ............. विशेषण-पदम् ...................... .......................... |
12. ............. .................... विशेष्य-पदम् ......................... |
13. अन्यपदानि :- विभक्तिपदानि , अव्ययपदानि , प्रत्ययान्त-पदानि ( गत्वा , आगत्य , ..... ) |
14. समाप्ति: | प्रणामा: / मात्रे नाम: / शुभं भूयात् |........
15. क: लिखति | भवत: पुत्र: / पुत्री / भगिनी | भवत: शिष्य: / मित्रम् / सुहृत् |
16. लेखकस्य नाम किम् ? रमेश: / सुरेश: / ..........

***************************************************************************

**अभ्यासार्थम् एकं पत्रम् :-**

भवतः नाम शिबू अस्ति । भवतः विद्यालये संस्कृत-नाटकस्य प्रदर्शनं भविष्यति । एतदर्थं स्वमित्रं सत्यनारायणम् प्रति लिखितं निमन्त्रण-पत्रम् मञ्जूषायाम् प्रदत्त-पदानाम् सहायता पूरयित्वा लिखत :- ½ x 10 = 5

नूतनविद्यापीठः-

(1) ………………………..

दिनांक: ..............................

प्रिय मित्र सत्यनारायण !

सप्रेम नम: ,

नववर्षस्य (2) ……………………. अत्र सर्वगतं कुशलम् । भवान् अपि कुशली इति मन्ये । अस्माकं विद्यालयस्य (3) .................... नववर्षस्य शुभावसरे भविष्यति । तत्र अस्माकं (4) ........................ “रमणीया हि सृष्टिरेषा” (5) इति .......................... प्रदर्शनं भविष्यति । अहम् तस्मिन् नाटके मयूरस्य अभिनयं (6)...................|भवान् तद्दर्शनाय (7) ............................ आगच्छतु । मम अपि (8) ........................ भविष्यति । सर्वेभ्य: अग्रजेभ्य: मम (9) ……………… निवेद्यताम् इति ।

भवतः मित्रम्

(10) ........................

| | |
|---|---|
| मञ्जूषा | शिबू , शुभकामना: , त्रिशूरत: , प्रणामान् , वार्षिकोत्सव: , नाटकस्य , विद्यालये , उत्साहवर्धनम् , करोमि , अत्र \| |

**उत्तराणि :- उपरि कथित 16 सहायकविषया: उत्तर-लेखने कथम् सहायका: भवन्ति इति पश्याम: -**

उपरि पठित 16 सहायकविषयाणाम् आधारेण कथम् उत्तरलेखनम् सरलं भवतीति पश्याम: -

| **सहायक-विषया:** | **उत्तराणि** |
|---|---|
| 1. क: पत्रम् लिखति ? / भवान् क: ? | ..................... |
| 2. कुत: लिखति ? | 1. त्रिशूरत: |
| 3. कं लिखति ? | ……………... |
| 4. कथम् सम्बोधयति ? | ……………… |
| 5. कथम् नमस्कारम् करोति ? | ……………… |
| 6. कथं प्रारम्भ: क्रियते ? | 2. शुभकामना: ( प्रथमा विभक्ति: ) |
| 7. विषय-प्रस्तुतीकरणम् | ……………… |
| 8. कर्तृपदम् | 3. वार्षिकोत्सव: ( प्रथमा विभक्ति: )Clue –भविष्यति<br>7. भवान् (प्रथमा-वि-एक) Clue-आगच्छतु |
| 9. क्रियापदम् | 6. करोमि ( क्रिया-उत्तमपुरुष-एकवचनम्)Clue-अहम् |
| 10. कर्मपदम् | 8. उत्साहवर्धनम् ( द्वितीया-वि-एक) |
| 11. विशेषण-पदम् | ........................... |
| 12. विशेष्य-पदम् | ............................ |
| 13. अन्यपदानि :- विभक्तिपदानि | 4. विद्यालये ( सप्तमी विभक्ति:) , 5.नाटकस्य (षष्ठी विभक्ति: ) |
| 14. समाप्ति: \| प्रणामा: / मात्रे नाम: | 9. प्रणामान् ( द्वितीया-वि-बहु) |
| 15. क: लिखति \| भवत: पुत्र: / पुत्री | ............................ |
| 16. लेखकस्य नाम किम् ? | 10. शिबू |

*** अनेन स्पष्टं भवति यत् मञ्जूषाया: पदानां :- लिंग-विभक्ति-पुरुष-वचन-कर्तृ-क्रिया–आदि पदानां ज्ञानेनपत्रे रिक्तस्थानपूर्ति: सरला भवति इति | अभ्यासेन भवताम् विश्वास: वर्धते |अत्र पत्रे एव रिक्तस्थानस्य वाक्ये एव सहायकपदानि ( Clue Words ) भवन्ति | मञ्जूषापदानाम् आधारेण रिकतस्थानस्य वाक्येClue Word मेलनेन उत्तरं शुद्धम् भवति |

**उत्तराणि** :- 1. त्रिशूरत: ( See- 1 ) , 2. शुभकामना: 3. वार्षिकोत्सव: 4. विद्यालये 5. नाटकस्य

6. करोमि 7. भवान् 8. उत्साहवर्धनम् 9. प्रणामान् 10. शिबू

*******************************

**अभ्यासाय पत्रम् :-**

Q.भवती कीर्त्ति: , कोलकतायां निवसति | ‘ भाषा-सङ्गम: ’ इति कार्यक्रमस्य विषये वर्णयन्त्या भवत्या उत्कलप्रदेशे निवसन्तीं सखीं विमलां प्रति लिखितं पत्रं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखतु । ½ x 10 = 5

बैरकपुरम्
कोलकतात:
तिथि:___________

अयि 1.___________ !

शुभाशंसा । अपिकुशलिनी भवती ? सर्वेऽपि परिवारजना: 2.___________ कृपया सुखोपेता: स्यु: इति आशासे । सखि ! अस्माकं विद्यालये अधुना ‘भाषा सङ्गम:’ इति कार्यक्रम: 3._____________ । एष: भारतसर्वकारेण 4.________ प्रसारार्थं प्रारब्ध: । अनेन कार्यक्रमेण छात्रा: द्वाविंशति-संख्यकानां भाषाणां ज्ञानार्जनं करिष्यन्ति । अस्माकं विद्यालयस्य 5.______________ वयं प्रतिदिनं पञ्चवाक्यानि वदाम: । अपिच अस्माभि: विविधानां 6.______________ नृत्यसङ्गीतानि प्रस्तूयन्ते । सर्वेऽपि कार्यक्रमा: यू-ट्यूब् मध्ये 7.____________ सन्ति ।

तेषां अवलोकनेन भवत्या: अपि मनोरञ्जनेन साकं 8.____________ भविष्यति । अस्मिन् विषये कृपया 9.____________ निवेदयतु । अन्यत् सर्वगतं कुशलम् । सर्वेभ्य: प्रणामा: ।

भवत्या:10.____________

कीर्त्ति:

**मञ्जूषा -** प्रार्थनासभायां , भाषाणां , विमले , ज्ञातिभ्य: , भगवत: , ज्ञानप्राप्ति: , प्रदेशानां , सखी , संरक्षिता: , प्रचलति |

*******************************************

**Q.3. अधोदत्तम् चित्रम् दृष्ट्वा मञ्जूषाया: सहायतया च संस्कृतेन पञ्चवाक्यानि लिखत - 1 x 5= 5**

**पाठ्यबिन्दूनां विवरणम् :-**

अस्मिन् प्रश्ने ध्यातव्या: विषया: :-

1. चित्रे क: / का / किम् अस्ति ? कौ / के / के स्त : ? के / का: / कानि सन्ति ?

उत्तरणि :- बालक: /बालकौ / बालका: ,वृक्ष: / वृक्षौ / वृक्षा: ,पुष्पम् / पूषपे पुष्पाणि

( एवं चित्रे दृश्यमानानां पदानां प्रथमाविभक्ति – रूपाणि (कर्तृ पदानि ) लिखन्तु )

2. चित्रे कर्तार: ( कर्तृपदानि / प्रथमाविभक्ति पदानि ) किं किं कुर्वन्ति ? ( तानि क्रियापदानि भवन्ति )

उत्तराणि :- कर्तृपदस्य वचनानुसारम् क्रियापदानि लिखन्तु | यथा :- क्रीडति / सन्ति / विकसन्ति |

एवं कर्तृ – क्रियापदानाम् ज्ञानं भवति |

सरलवाक्य – निर्माणार्थम् कर्तृ – क्रियापदानाम् ज्ञानं आवश्यकम् | पश्याम: वाक्यरचनाम् -

वाक्यम्

| कर्तृपदम् | क्रियापदम् |
|---|---|
| बालक: / बालकौ / बालका: | क्रीडति / त: / न्ति \| |

इदानीम् क्रियापदस्य आधारेण **प्रश्ना: -**

| | |
|---|---|
| यथा :- बालक: कुत्र क्रीडति ? | बालक: उद्याने क्रीडति \| |
| बालक: कै: सह क्रीडति ? | बालक: मि त्रै : सह क्रीड ति \| |

3. एवमेव **( See Q.2**मञ्जूषादत्त-पदानाम् लिंग-विभक्ति-क्रिया-पुरुष-आदि पदानां ज्ञानम् आवश्यकम् )

एवं संदर्भानुसारम् प्रश्नकरणेन उत्तराणि मिलन्ति ? ( **See –Q.1**विवरणम् )

* प्रत्येकस्मिन् वाक्ये कर्तृपदस्य ( 1 ) वचनानुसारम् क्रियापदस्य( k ) वचनम् भवतु |

अत्र संख्या विभक्तिम् सूचयति | यथा :- 1 – प्रथमा-विभक्तिपदम् इति |

अत्र k क्रियापदम् सूचयति | यथा :- k – क्रियापदम् इति |

**See –Q.4–IV कारक-विभक्ति: उपपदविभक्ति: च |**

तत्र क्रियापदानाम् / पदानाम् आधारेण कथं वाक्यनिर्माणम् भवति इति जानीम: |

**उदाहरणानि :- वाक्य- निर्माणाय तालिका :-**

| | |
|---|---|
| 1. इदं ...........6………… चित्रम् अस्ति \| | 1) इदं उद्यानस्य/विद्यालयस्य चित्रम्अस्ति \| |
| 2. अस्मिन् चित्रे .......1....... .......k…. \| | 2) अस्मिन् चित्रे **बालकाःक्रीडन्ति / पठन्ति\|** |
| 3. .....6......समीपे/अध:/उपरि....1.... ....k….\| | 3) वृक्षस्य उपरि **पुष्पाणि दृश्यन्ते / सन्ति\|** |
| 4. ....7.... ....1..... ...k….. \| | 4) मार्गे **जना: भ्रमन्ति\|** |
| 5. इदं चित्रम् सुन्दरम् अस्ति \| | 5) इदं **चित्रम्**सुन्दरम् **अस्ति \|** |

क्रियापदानि :- एक दिखता है –**दृश्यते** , दो दिखते हैं –**दृश्येते,** अनेक दिखते हैं –**दृश्यन्ते|**

यथा :- अस्मिन् चित्रे **वृक्ष: दृश्यते** / **वृक्षौ दृश्येते** / **वृक्षा: दृश्यन्ते**|OR

अस्मिन् चित्रे **वृक्ष: अस्ति** / **वृक्षौ स्त:** / **वृक्षा: सन्ति|**

******************************

**अभ्यासार्थम् चित्रम् -**

**Q.अध: दत्तं चित्रं दृष्ट्वा मञ्जूषाया: सहायतया संस्कृतेन पञ्च वाक्यानि लिखत - 1 x 5 = 5**



मञ्जूषा:- [ पर्वता: , वृक्षा: , खगा: , गृहाणि , पुष्पाणि, गच्छत: ,
उन्नता: , आकाशे , सूर्य: , उत्पतन्ति, उदेति , सन्ति ]

1. मञ्जूषायां प्रदत्त-पदानाम् विभाग: :-

| प्रथमा-विभक्ति-पदानि | अन्यपदानि | क्रियापदानि |
|---|---|---|
| पर्वता: ( 1 ) | | गच्छत: ( k ) |
| वृक्षा: ( 1 ) | | उत्पतन्ति ( k ) |
| खगा: ( 1 ) | | उदेति ( k ) |
| सूर्य: ( 1 ) | | सन्ति ( k ) |
| गृहाणि ( 1 ) | आकाशे ( 7=मे ) | |

इदानीम् See **Q.3 उदाहरण-तालिकाधारेण वाक्यानि रचयाम -**

| | |
|---|---|
| 1. इदं ...........6………… चित्रम् अस्ति \| | 1) इदं **पर्वतीयस्थलस्य**चित्रम्अस्ति \| |
| 2. अस्मिन् चित्रे .......1....... .......k…. \| | 2) अस्मिन् चित्रे **उन्नता:पर्वता:** सन्ति / दृश्यन्ते \| |
| 3. .....6......समीपे/अध:/उपरि....1.... ....k….\| | 3) **पर्वतस्य** समीपे **गृहाणि दृश्यन्ते / सन्ति\|** |
| 4. ....7.... ....1..... ...k….. \| | 4)**आकाशे सूर्य: उदेति\|** |
| 7 1 k | **5) आकाशे खगा: उत्पतन्ति\|** |
| 5. इदं चित्रम् सुन्दरम् अस्ति \| | 6)इदं **चित्रम्** सुन्दरम् **अस्ति \|** |

****************************

**अभ्यासार्थम् चित्रम् -**

**Q.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तश-सहायतयापञ्च वाक्यानि संस्कृतेन लिखत- 1x5=5




**मञ्जूषा-** पञ्जरे, द्वेत्वासिके, इतस्ततः, अनेके, पश्यन्ति,जन्तुशालायाः, दृश्यन्ते, प्रसीदन्ति, जन्तवः, गण्डकः, मयूरः, पुरूषः, उष्ट्रग्रीवः, महिला, सह, दर्शकाः, बालाः, सिंहः।

*************************

**उत्तराणि :-**

1. एतत् जन्तुशालायाः चित्रम् अस्ति।
2. अत्र पञ्जरे सिंहः, गण्डकः, मयूरः, हरिणः उष्ट्रग्रीवःइत्यादयः अनेके जन्तवः दृश्यन्ते।
3. दर्शकाः इतस्ततः भ्रमन्ति।
4. पुरूषः महिला च बालैः सह जन्तून् पश्यन्ति |
5. सर्वे बालाः तान् जन्तून् दृष्ट्वा प्रसीदन्ति।

**Q.4. अधोलिखितानि वाकयानि ( हिन्दी &English ) संस्कृतभाषया अनूद्य लिखत -**

**( केवलं वाक्यपंचकम् ) 1 x 5 = 5**

**पाठ्यबिन्दूनां विवरणम् :-**

हिन्दी भाषायाः वाक्यानि संस्कृतेन अनूद्य लेखनाय आवश्यक-पदानां परिशीलनं कुर्मः -

**I वाक्यम्**

| कर्तृपदानि | | | | क्रियापदानि | | |
|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| सः (=वह ) | तौ (=वे दोनों ) | ते (=वे सब ) | प्रथम | पतति | पततः | पतन्ति |
| सा | ते | ताः | प्रथम | पतति | पततः | पतन्ति |
| तत् | ते | तानि | प्रथम | पतति | पततः | पतन्ति |
| त्वम् (=तुम ) | युवाम् (=तुम ) | यूयम् (=तुम सब) | मध्यम | पतसि | पतथः | पतथ |
| अहम् (=मैं ) | आवाम् (हम दोनों) | वयम् ( हम सब) | उत्तम | पतामि | पतावः | पतामः |

**II विभक्ति के अर्थ तथा संस्कृत-प्रत्ययाः च**

| विभक्तिः | अर्थः | | एकवचनम् बालक | एकवचनम् पुष्प | एकवचनम् बालिका |
|---|---|---|---|---|---|
| प्रथमा | = ने | ---- | : | अम् | आ |
| द्वितीया | = को | TO | म् | म् | आम् |
| तृतीया | = से ,के साथ | BY ,WITH | एन | एन | अया |
| चतुर्थी | = के लिए | FOR | आय | आय | आयै |
| पञ्चमी | = से ( अलग ) | FROM | आत् | आत् | आयाः |

| | | | | |
|---|---|---|---|---|
| षष्ठी | = का , की , के | OF | अस्य | अस्य आया: |
| सप्तमी | = में , पर | IN /ON | ए | ए आयाम् |
| सम्बोधन प्रथमा | = रे , अरे , हे | O ! | हे ..... अ ! | हे ..... अ !हे.... ए ! |

## III लिंगानुसारम् पदावलि:

| पुंलिंग-पदानि | नपुंसकलिंग-पदानि | स्त्रीलिंग-पदानि |
|---|---|---|
| हिन्दी – संस्कृतम् | हिन्दी – संस्कृतम् | हिन्दी – संस्कृतम् |
| गांव - ग्राम | बगीचा - उद्यानम् | बाजार – विपणि |
| रास्ता - मार्ग | पुस्तक - पुस्तकम् | शाखा - शाखा |
| पेड - वृक्ष | दुकान - आपणम् | |
| | पेन - कलमम् | |
| | दूध - दुग्धम् | |
| | घर - गृहम् | |
| | सब्जी - शाकम् | |

## IV विभक्ति:

| कारकविभक्ति: | उपपदविभक्ति: |
|---|---|
| वाक्ये यानि पदानि क्रियया सह सम्बद्धानि भवन्ति तानि कारकाणि कथ्यन्ते \| कारकेषु विभक्तय: भवन्ति \|<br>यथा - **छात्र: विद्यालयं** गच्छति \| क: गच्छति ?<br>**छात्र:** गच्छति \| छात्र: कुत्र गच्छति ?<br>**विद्यालयं** गच्छति \|<br>अत: अत्र **छात्र कर्तृकारकम्\|विद्यालय कर्मकारकम्\|**<br>कर्तृकारके प्रथमा विभक्ति: \| कर्मकारके द्वितीया विभक्ति: च \| | वाक्ये केषाञ्चन-शब्दानाम् अव्ययानाम् वा कारणेन (उप)=समीपे (पद) पदे या (विभक्ति: ) विभक्ति: भवति सा उपपदविभक्ति: कथ्यते \|<br>यथा :- **<u>विद्यालयं परित:</u>** वृक्षा: सन्ति \|<br>छात्र: **<u>विद्यालयात् बहि:</u>** गच्छति \|<br><br>**परित:** योगे द्वितीया \|**बहि:** योगे पञ्चमी \| |
| **द्वितीया :-**<br>**गच्छति**= जाता है - छात्र: गृहं गच्छति \|<br>**अनुसरति** = पीछे जाता है – पुत्र: **जनकम् अनुसरति**<br>**नयति** = ले जाता है - महिला **जलं नयति\|**<br>**आनयति** = लाता है - महिला **जलं आनयति\|**<br><br>**तृतीया** :- येन पदेन / प्रधान-कारणेन क्रियासिद्धि: भवति<br>तत्र तृतीया विभक्ति: \|-<br>छात्र: **कलमेन** लिखति \|<br>**चतुर्थी** :- **निवेदयति** = निवेदन करता है ,<br>छात्र: **प्रधानाचार्याय निवेदयति\|**<br>यच्छति = देता है – माता **पुत्राय** दुग्धं यच्छति \|<br>कृध्यति = क्रोध करता है – पिता **पुत्राय** कृध्यति \|<br>**पञ्चमी** :- ( भय का कारण )बिभेति= डरता है<br>बाल: **सिहात् बिभेति\|**<br>निस्सरति = निकलता /ती है ,<br>प्रभवति = उत्पन्न होती है<br>गंगा**हिमालयात्** प्रभवति / निस्सरति \|<br>**सप्तमी :- विश्वसति = विश्वास करता है–**<br>छात्र: **परिश्रमेविश्वसति \|** | **द्वितीया :-**<br>चारों ओर = **परित:**-ग्रामं परित: वृक्षा: सन्ति \|<br>दोनों तरफ =**उभयत:- मार्गम् उभयत:** वृक्षा: सन्ति \|<br>की तरफ = **प्रति**-बाल: **गृहं प्रति** गच्छति \|<br>बिना = **विना** - जलं विना जीवनं नास्ति \|<br><br>**तृतीया :-**<br>साथ = सह - बाल: **मित्रै: सह** क्रीडति \|<br>बिना = विना - **जलेन विना** जीवनं नास्ति \|<br><br>**चतुर्थी** :- नमस्कार = नम: **-गुरवे नम:**\|<br><br>**पञ्चमी** :- बाहर = बहि: -बाल: **गृहात् बहि:** गच्छति \|<br>**षष्ठी** :- ऊपर = उपरि , पास = समीपे , नीचे = अध: .<br>**वृक्षस्य उपरि / समीपे / अध:** पुष्पाणि दृश्यन्ते \|<br>**सप्तमी** :- श्रेष्ठ: / कुशल: / निपुण:<br>छात्र: **क्रीडायां** श्रेष्ठ: / कुशल: / निपुण: \| |

## V क्रियापदानि

1. वाक्यनिर्माणे कर्तृपदस्य पुरुष तथा वाचनानुसारम् क्रियापदस्य प्रयोग: भवतु |
2. वाक्यविस्तारे क्रियापदस्य आधारेण कारकस्यअवबोध: भवतु |
3. वाक्यविस्तारे केषांचन अव्यायानाम् / शब्दानाम् ( उपपदविभाक्ते: ) अवबोध: भवतु |
4. क्रियापदानाम् अवबोध: पञ्च-लकारेषु भवतु |

| धातु: | = अर्थ: | लट् | लृट् | लङ् | लोट् | विधिलिङ् |
|---|---|---|---|---|---|---|
| गम् | = जाना | गच्छति | गमीष्यति | अगच्छत् | गच्छतु | गच्छेत् |
| *आ+गम् | = आना | आगच्छति | | | | |
| दृश् | = देखना | पश्यति | द्रक्ष्यति | अपश्यत् | पश्यतु | पश्येत् |
| पा | = पीना | पिबति | पास्यति | अपिबत् | पिबतु | पिबेत् |
| स्था | = ठहरना | तिष्ठति | स्थास्यति | अतिष्ठत् | तिष्ठतु | तिष्ठेत् |
| गै | = गाना | गायति | गास्यति | अगायत् | गायतु | गायेत् |
| पत् | = गिरना | पतति | पतिष्यति | अपतत् | पततु | पतेत् |
| नी | = ले जाना | नयति | नेष्यति | अनयत् | नयतु | नयेत् |
| *आ+नी | = लाना | आनयति | | | | |
| भ्रम् | = घूमना | भ्रमति | भ्रमिष्यति | अभ्रमत् | भ्रमतु | भ्रमेत् |
| कृ | = करना | * करोति , | श्रु = सुनना | * श्रुणोति | * शक्लृ= सकना* | शक्नोति |

**लट् – लकार: ( वर्तमानकाल: )**

1. <u>लडकाबगीचे मेंघूमता है|</u> <u>बालक:उद्यानेभ्रमति</u>|(unit के अनुसार अनुवाद )
2. **तुमदोनों**<u>प्रतियोगिता मेंगानागा रहे हो|युवांप्रतियोगितायांगीतंगायथ:</u>|

**लृट् – लकार: ( भविष्यत् काल: )**

1. क्यातुममेरीमददकरोगे| किंत्वं ममसहयतांकरिष्यसि|

**लङ् – लकार: ( भूतकाल: )**

1. लडकेकलशहरगए थे| बालका:ह्य:नगरम् अगच्छन्|

**लोट् – लकार: ( आज्ञार्थे )**

1. तुमपानीपीओ| त्वं जलंपिब |

**विधिलिंङ्-लकार: ( कामनार्थे / चाहिए )**

1. हमें संस्कृतव्याकरणपढना चाहिए| वयंसंस्कृत-व्याकरणंपठेम |

## VIप्रत्ययान्त-क्रियापदानि

* अनुवादाय प्रत्ययान्त-क्रियापदानि अपि आवश्यकानि भवन्ति |

1) तुमुन् – प्रत्यय: ( = के लिए & शेष: - तुम् , तुमुन्नन्त-पदम् अव्ययम् इव प्रयुज्यते | )

2) क्त – प्रत्यय: ( = भूतकालार्थे & शेष: - त , क्तान्त – पदानाम् रूपाणि त्रिषु लिंगेषु भवन्ति |

3) क्तवतु – प्रत्यय: ( = भूतकालार्थे & शेष: - तवत् , क्तवत्वन्त – पदानाम् रूपाणि त्रिषु लिंगेषु भवन्ति |

4) क्तिन् – प्रत्यय: ( = इ-कारान्त स्त्रीलिंग: शब्द: भवति & शेष:- ति – स्त्रियाम् क्तिन् )

5) इन् – प्रत्यय: ( = युक्तार्थे , शेष: - इन् गुण + इन् – गुणिन् – गुणी / गुणिनौ / गुणिन: )

**रूप-तालिका**

| **धातु:** | **= अर्थ:** | **तुमुन्** | **क्त** | **क्तवतु** |
|---|---|---|---|---|
| गम् | = जाना | गन्तुम् | गत: / गता / गतम् | गतवान् / गतवती / गतवत् |
| दृश् | = देखना | द्रष्टुम् | दृष्ट: / दृष्टा / दृष्टम् | दृष्टवान् / दृष्टवती / दृष्टवत् |
| पा | = पीना | पातुम् | पीत: / पीता / पीतम् | पीतवान् / पीतवती / पीतवत् |
| स्था | = ठहरना | स्थातुम् | स्थित: / स्थिता / स्थितम् | स्थितवान् / स्थितवती / स्थितवत् |
| नी | = ले जाना | नेतुम् | नीत: / नीता / नीतम् | नीटवान् / नीतवती / नीतवत् |
| कृ | = करना | कर्तुम् | कृत: /कृता / कृतम् | कृतवान् / कृतवती / कृतवत् |
| श्रु | = सुनना | श्रोतुम् | श्रुत: / श्रुता / श्रुतम् | श्रुतवान् / श्रुतवती / श्रुतवत् |

* क्रीड् = खेलना , खेलने के लिए –क्रीडितुम्/ क्रीडनाय ,पढ़ना ,पढ ने के लिए – पठितुम् / पठनाय ,

यथा :- 1. मैंसत्यबोलनाचाहता हूं– अहंसत्यम्वक्तुम्इच्छामि|

2. पिता बाजार गए थे | - पिता विपणिं गतवान् |

3. लड़की गाना सुनी थी | - बालिका गीतं श्रुतवती |

उपर्युक्त – पाठ्यबिन्दूनां आधारेण **उदाहरणानि :-**

**अभ्यास: :- अधोलिखितानि ( हिन्दी &English )वाकयानि संस्कृतभाषया अनूद्य लिखत -**

**( केवलं वाक्यपंचकम् ) 1 x 5 = 5**

**ध्यातव्य-विषया: :- हिन्दी वाक्ये कर्तृपदानि** ,हिन्दीविभक्ति के अर्थ के साथ रहने वाले पदों में अर्थानुसार -See -Q.No.3 -**II विभक्ति के अर्थ तथा संस्कृत-प्रत्यय-तालिका )**

संस्कृतपदानां निर्माणं कृत्वा सार्थकवाक्यानि लिखत | पश्याम: तावत् -

**उपर्युक्त-विवरणानुसारम् उदाहरणानि :-**

1. बालकविद्यालय कोजाते हैं|-बालका:विद्यालयंगच्छन्ति| ( जाते हैं Clue बहुवचनम् )

**( कर्तृपद–बालक-बालका: )(विद्यालय को - द्वितीयार्थ:- विद्यालयं)**

**( जाते हैं – क्रियापद – गच्छन्ति ) - एवं हिन्दी वाक्यानाम् अनुवाद: करणीय: |**

**एवमेव अस्मिन् प्रश्ने हिन्दी पदानाम् आधारेण संस्कृतपदानि रचयित्वा सार्थक-संस्कृत-वाक्यानि रचयत |**

2. लड़की घर से पानी लाती है | - बालिका गृहात् जलम् आनयति |
3. क्या मैं अन्दर आ सकता हूं ? - किम् अहम् अन्त: आगन्तुम् शक्नोमि ?
4. वे सब पानी पीने केलिए वहां जाते हैं |- ते जलं पातुम् तत्र गच्छन्ति |
5. बादलों से पानी गिरता है | - मेघेभ्य: जलं पतति |
6. गंगा हिमालय से निकलती है | - गंगा हिमालयात् निस्सरति |
7. हम सब कल गांव को जाएंगे | - वयं श्व: ग्रामं गमिष्याम: |

**अभ्यासाय हिन्दी / English – वाक्यानि संस्कृत-भाषया अनूद्य लिखत –( केवलं वाक्य-पञ्च कम् :-1 x 5=5**

1. माता खाना पकाती है | 1. Mothercooks food .

| | |
|---|---|
| 2. हम सब संस्कृत पढ़ते हैं \| | 2. We study Sanskrit . |
| 3. कल विद्यालय का अवकाश रहेगा \| | 3.Tomorrow the school will remain closed. |
| 4. कल तुम कहां थे ? | 4. Wherewereyou yesterday . |
| 5. तुम कल कलम से लिखो \| | 5. All of you write with pen . |
| 6. बच्चे कुत्ते से डरते हैं \| | 6. The Childis scared of dog . |
| 7. क्या मैं अन्दर आऊं ? | 7. May I come in ? |

**************************************

## ग – खण्ड: ( अनुप्रयुक्त–व्याकरणम् ) 25

**Q.5. अधोलिखितेषु रेखांकित-पदेषु सन्धिं सन्धिच्छेदं वा कुरुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

**पाठ्यबिन्दूनां विवरणम् उदाहरणानि च :-** द्वयो: पदयो: मेलनं सन्धि: कथ्यते |

**तत्र पूर्वपदस्य अन्तिमवर्ण: पूर्ववर्ण: / X कथ्यते + परपदस्य पूर्ववर्ण: परवर्ण: / Y कथ्यते = Z (x &y स्थाने )**

| | | | | | |
|---|---|---|---|---|---|
| **अर्थात् -** | **पूर्ववर्ण: / X** | **+** | **परवर्ण: / Y** | **=** | **विकार: / आदेश: / Z** |
| **क) व्यञ्जन-सन्धि: -** | | | | | |
| 1. **तुगागम: -** | **ह्रस्व-स्वर:** | **+** | **छ** | **=** | **च् ( आदेश: )** |
| | अनु | + | छेद: | = | अनुच्छेद: |
| **2. अनुस्वार: -** | **( पदान्त ) म्** | **+** | **कोऽपि व्यञ्जनवर्ण:** | **=** | **अनुस्वार:** |
| | धर्मम् | + | चर | = | धर्मं चर |
| 3. **जश्त्व-सन्धि: -** | **वर्गस्य प्रथमवर्ण:** | **+** | **कोऽपि स्वर:, वर्गस्य 2 , 3 , 4 वर्णा: , श् , ष् , स्** | **=** | **(x) वर्ण-वर्गस्य तृतीय: वर्ण:** |
| | जगत् | + | ईश: | = | जगदीश: |
| 4. **अनुनासिक -** | **वर्गस्य 1 वर्ण:** | **+** | **वर्गस्य 5 वर्ण:** | **=** | **(x) वर्ण-वर्गस्य पञ्चम: वर्ण:** |
| | जगत् | + | माता | = | जगन्माता |
| **ख) विसर्ग-सन्धि: -** | **X** | **+** | **Y** | **=** | **Z** |
| **1. उत्वम् -** | **अ:** | **+** | **अ , वर्गस्य -3,4,5, य् , र् , ल् , व् , ह्** | **=** | **(x): - उ (अ+उ=ओ) (y) अ –ऽ (अवग्रह: )** |
| | स: | + | अपि | = | सोऽपि |
| | राम: | + | गच्छति | = | रामो गच्छति |
| **2. रत्वम् -** | **अ/आ भिन्न-स्वर :** | **+** | **कोऽपि स्वर: वर्गस्य -3,4,5,** | **=** | **(x) : - र् ( र्+yस्वर-मात्रा/ रेफ: )** |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | **य् ,र् ,ल् ,व्,ह** | | |
| | | नि: | + | बल: | = | निर्बल: |
| | | मुनि: | + | अत्र | = | मुनिरत्र |
| **3. विसर्ग-लोप: -** | **क)** | **अ:** | **+** | **अ भिन्न-स्वर:** | **=** | **(x) : - लोप:** |
| | | राम: | + | आगच्छति | = | राम आगच्छति |
| | **ख)** | **आ:** | **+** | **कोऽपि स्वर:** | **=** | **(x) : - लोप:** |
| | | | | **वर्गस्य -3,4,5,** | | |
| | | | | **य् ,र् ,ल् ,व्,ह** | | |
| | | देवा: | + | जयन्ति | = | देवा जयन्ति |
| **4. क)** | **शत्वम्** | **:** | **+** | **श् , च् , छ्** | **=** | **(x) : - श्** |
| | | क: | + | चित् | = | कश्चित्त |
| **ख)** | **सत्वम्** | **:** | **+** | **स् , त् , थ्** | **=** | **स्** |
| | | नम: | + | ते | = | नमस्ते |
| **ग)** | **षत्वम्** | **:** | **+** | **ष् , ट् , ठ् , क्** | **=** | **ष्** |
| | | नि: | + | ठुर: | = | निष्ठुर: |

---

* उपर्युक्त – सन्धीनाम् नियमानुसारेण अध: प्रदत्त-पाठान्तर्गत-पदानाम् सन्धिम् विच्छेदम् वा कुरुत –

* प्रदत्त-पदेषु **= Z** (आगमम् /आदेशम् दृष्ट्वा ) उपरि प्रदत्त-नियमानुसारम् सम्यक् दृष्ट्वा तत् आधारेण **X** ( पूर्ववर्णम् ) + **Y** ( परवर्णम् ) च ( उताराणि ) लिखत |

* एवमेव प्रदत्त-पदेषु **X** ( पूर्ववर्णम् ) + **Y** ( परवर्णम् ) दृष्ट्वा उपरि प्रदत्त-नियमानुसारम् सम्यक् दृष्ट्वा तयो: ( X &Y ) आधारेण Z ( आदेशम् / आगमम् / विकारम् ) लिखत |

---

**अभ्यासार्थम् पाठ्यपुस्तकात्** C B S E निर्धारित- सन्धिकार्ये उपर्युक्त- नियमानुसारम् अध: प्रदत्त-सन्धिपदानां सन्धिम् सन्धिविच्छेदम् वा कृत्वा **उत्तराणि** स्वयं प्रदत्त-स्थाने लिखत :-

| | | |
|---|---|---|
| | दुर्वहम् - .......... + ..................... , | चलत् + अनिशम् = ......................... |
| | निर्मलं जलम् - .............. + ............ , | प्रकृति: + एव = ......................... |
| पाठ: - 1 | सञ्चरणम् - ........... + .................. , | बहि: + अन्त: = .......................... |
| | नो कुर्यात् - ............ + ............... , | स्यात् + मे = ......................... |
| | लतातरुगुल्मा नो भवन्तु - .................................. + ................ + ................. \| | |
| पाठ: - 2 | कश्चित्त - ................ + ................. , | पितु: + गृहम् = ...................... |
| | अन्योऽपि - ............... + .................... , | यत् + मानुषात् + अपि = .................... |
| | तदग्रत: - ................ + ............... , | बुद्धि: + बलवती = ....................... |
| पाठ: - 3 | कान्तिर्गात्राणाम् - ................ + ...................... , | व्यायामात् + उपजायते = ................. |
| | वयो रूप - ...................... + ................ , | गुणै: + हीनम् = ………….. |
| | अतोऽन्यथा - ............... + .................... , | वायु: + यदा = ......................... |

जन्तोस्तद् - .................. + ................ , वयः + बलशारीराणि = ....................

---

**पाठः - 4**

कुशलं महाराजस्य - ................ + ................ , युषमत् + दर्शनात् = .......................

पुनरतिथिजन - ............. + ........................... , तस्मात् + अंक = .........................

हिमकरोऽपि - ..................... + .................. ,केतक + छदत्वम् = .........................

भवतोर्वंशस्य - .......................... + ...................... , आर्यः + अपि = .........................

एतयोर्जननी - ...................... + .......................... , धिक् + मामेव = .......................

मन्युगर्भैरक्षरैः - ......................... + ...................... , दारुणः + च = ............................

इतस्तावद् - ...................... + ............................ , सन्दर्भः + अयम् = ........................

सुहृज्जनसाधारणम् -................ + .................. , सत् + निधीयन्ताम् = ......................

अस्मदन्तिकम् - ....................... + ........................ , तत् + अहम् = ........................।

---

**पाठः - 5**

सुरभेरिमाम् - ........................ + ......................... , अशक्तः + च = ........................

उद्वहति - .................. + .......................... ,कः + चित् = ........................ ।

---

**पाठः - 6**

यं नावसीदति - ............ + ......... + ...................... , निः + बलः = .......................

निर्गुणो - ............... + ......................... , मनः + तु = ......................

जनस्तम् - .................... + ................ , नागाः + च = ....................

पीडितो जनः - .................... + ............. , वह्निः + दहते = ........................

तुरगास्तुरगैः - ....................... + ................ , दुः + लभः = .........................

किञ्चिन्निरर्थकम् - ......... + .......... + .................. , अश्वः + चेत् = .....................

---

**पाठः - 7**

सन्न - ...................... + ..................... , इतः + ततः = .........................

कृतान्तो न - ........................ + .............. , ध्वनिः + अस्ति = ........................

आदर्शच्छात्रः - ........................ + ................... , एतस्मात् + एव = ..........................

यदहमेव - ............ + ................. + ............. , जन्तुभिः + च = ..........................

नौरिव - ......................... + ....................... , सम्यक् + नेता = ..........................

सम्यगुक्तम् - ………………... + ........................ , एतत् + अर्थम् = ......................

यदेषः - ......................... + ..................... , यत् + मयूरः = ........................

सिद्धिर्भविष्यति - .................... + ...................... , वस्तुतः + तु = .....................

तद्यथा - ....................... + ......................... , लाभः + तेषाम् = ........................

---

**पाठः - 8**

पदातिरेव - ..................... + ......................... , कम् + चित् = ..........................

अनुगृहणाच्च - ........................... + ................... , प्रबुद्धः + अतिथिः = ......................

ततोऽसौ - ....................... + .......................... , कः + चित् + जनः = ....................

पुनस्तौ - ..................... + ............................... , यत् + उक्तम् = ...........................

---

पाठः - 9 तपस्तेपे - ................. + ......................... , तत् + एव + आहुः = .......................

विद्वांस एव - ................. + .................... , लोके + अस्मिन् = ......................

वाक्पटुर्धैर्यवान् - .............. + ...................., परैः + न = ..............................

कुर्यादहितम् - ................. + ................ , सत् + आचारम् = ..........................

प्रथमो धर्मः - .................. + ................ , प्राणेभ्यः + अपि = ..........................

---

पाठः - 11 अस्मज्जन - ..................... + ............... , पुनः + अधन्यो = ........................

कीदृशस्तृणानाम् -................ + ............. , आसीत् + अस्मत् + गृहे = .......................

पुनरसन्तम् - .................... + ...................... , निः + चयः = ............................

कुर्यादिदानीम् - .................. + ................ , दुः + करम् = ..............................

**************************

**अभ्यासाय प्रश्नाः :-**

**Q. अधोलिखितेषु रेखांकित-पदेषु सन्धिं सन्धिच्छेदं वा कुरुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

i) चाकचिक्यजालं नो **कुर्याज्जीवित**-रसहरणम् ।

ii)**तयोः + एकः**वृषभः दुर्बलः आसीत् ।

iii) विदूषकः : - **इत इत** आर्यौ !

iv)**धूमम् + मुञ्चति** शतशकटीयानम् ।

v)गावश्च गोभिः **तुरंगास्तुरंगैः**।

---

**Q.No.6. अधोलिखितेषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त-विकल्पेभ्यः चित्वा लिखत -**

**( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

**पाठ्यबिन्दूनां विवरणम् उदाहरणानि च :- "संक्षिप्तीकरणम् समासः"**

1. पदानां योजनम् समासः = ( समस्तपदम् )
2. समस्तपदानां पृथक्करणम् = विग्रहवाक्यम्

**1. तत्पुरुषः** :- उत्तरपद-प्रधानः समासः ।

क) विभक्ति-तत्पुरुषः:- उत्तर-पद-आधारेण पूर्वपदे या विभक्तिः भवति ,

तया विभक्त्या तत्पुरुष-समासस्य नाम भवति ।

1. द्वितीया-तत्पुरुष-समासः - श्रित , अतीत , पतित , गत , प्राप्त , गामि , बुभुक्ष-शब्दैः सह भवति ।

यथा :- **कृष्णम् श्रितः - कृष्णश्रितः**।

एवमेव अन्य-पदानाम् योगे पूर्वपदे द्वितीया-विभक्तिः।

**गृहगतः** बालकः अतीवप्रसन्नः भवति । ..........................

2. तृतीया-तत्पुरुष-समासः - पूर्व , सदृश , सम , ऊनार्थ , काल , निपुण , मिश्र ,

आदि शब्द-योगे तृतीया ।

यथा :- **सप्ताहेन पूर्व: - सप्ताहपूर्व: , मात्रा सदृश: - मातृसदृश:|**

3. चतुर्थी-तत्पुरुष-समास: - हित , अर्थ , बलि , सुख , आदि शब्द-योगे चतुर्थी विभक्ति: भवति|

यथा :- **जनेभ्य: हितम् – जनहितम्|**

4. पञ्चमी-तत्पुरुष-समास: - मुक्त , पतित , भय ,भीति , भी , शब्द-योगे पञ्चमी विभक्ति: भवति |

यथा :- **व्याघ्रात् भीत: - व्याघ्रभीत: |**

5. षष्ठी-तत्पुरुष-समास: - यदि उत्तरपदस्य सम्बन्ध: पूर्वपदेन सह भवति तर्हि पूर्वपदे षष्ठी विभक्ति:|

यथा :- **जीवनस्य रक्षा – जीवनरक्षा |**

6. सप्तमी-तत्पुरुष-समास: - कुशल, प्रवीण, निपुण, सिद्ध – आदि शब्द-योगे सप्तमी विभक्ति: भवति |

यथा :-**शास्त्रेषु निपुण: - शास्त्रनिपुण:|**

**2. बहुव्रीहि-समास:** | ( तृतीयार्थ-प्रधान: ) ( त्रिनेत्र: = तीन आंखों वाला = शिव:

(अत्र – त्रि एवं नेत्र पदयो: अर्थ: अप्रधान: )

| | पूर्वपदम् | उत्तरपदम् | "यत्" शब्दरूपाणि | "तत्" रूपाणि | = समस्तपदम् |
|---|---|---|---|---|---|
| यथा :- | पीतम् | अम्बरम् | यस्य | स: | = पीताम्बर: (=विष्णु: ) |
| | प्रभूतं | सलिलम् | यसमिन् | तत् | = प्रभूतसलिलम् (=सर:) |

**3. अव्ययीभाव-समास:** - क) समस्तपदे पूर्वपदम् अव्ययपदम् / उपसर्ग: भवति |

ख) अव्ययस्य अर्थ: विग्रहवाक्ये उत्तरपदम् भवति पूर्वपदे च विभक्ति: भवति |

ग) समस्तपदं नपुंसकलिंग-एकवचने भवति |

| | अव्ययपदम् | अर्थ: | विभक्ति: | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|---|---|---|
| 1. | अनु | पश्चात् | षष्ठी | रथस्य पश्चात् | अनुरथम् |
| 2. | उप | समीपम् | द्वितीया | वृक्षस्य समीपम् | उपवृक्षम् |
| 3. | सह / स | सहितम् | तृतीया | चक्रेण सहितम् | सचक्रम् |
| 4. | निर् | अभाव: | षष्ठी | जनानाम् अभाव: | निर्जनम् |
| 5. | प्रति | * उत्तरपदम् द्विवारम् | प्रथमा / सप्तमी | एकम् एकम् | प्रत्येकम् |
| 6. | यथा | अनतिक्रम्य | द्वितीया | शक्तिम् अनतिक्रम्य | यथाशक्ति |

**4. द्वन्द्व समास:**| च ( = और ) अर्थे द्वन्द्व: |

**क)इतरेतरद्वन्द्व:** -समस्तपदम् – विग्रहवाक्य-स्थित-पूर्व-उत्तर-पदयो: वाचनानुसारम् उत्तरपदे भवति |

| | पूर्वपदम् | च | उत्तरपदम् | च | अनयत् पदम् | च | समस्तपदम् |
|---|---|---|---|---|---|---|---|
| यथा :- | राम: | च | कृष्ण: | च | ................ | ..... | रामकृष्णौ |
| | पत्रम् | च | फलम् | च | पुष्पम् | च | पत्रफलपुष्पाणि |

**ख)समाहारद्वन्द्व:** - * समस्तपदम् नपुंसकलिंग-एकवचने भवति |

* विग्रहवाक्ये पूर्व-उत्तर-पदयो: वाचनानुसारम् तयो: / एतेषाम् /

तेषाम् समाहार: इति आगच्छति |

| | पूर्वपदम् | च | उत्तरपदम् | च | तयो: / ए/तेषाम् | समाहार: | समस्तपदम् |
|---|---|---|---|---|---|---|---|
| यथा :- | अह: | च | निशा | च | अनयो: / तयो: | समाहार: | अहर्निशम् |

ग) **एकशेषद्वन्द्व:** - * पूर्व-उत्तरपदे प्रसिद्ध-युगलम् (=जोड़ी / Pair ) भवति |

* तयो: पुंलिंग-शब्द एव समस्तपदे शेष: वचनानुसारम् भवति |

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा :- | माता | च | पिता | च | - | पितरौ |
| | हंस: | च | हंसी | च | - | हंसौ |

***********************************

* उपर्युक्त–समास-नियमानुसारेण अध: प्रदत्त-पाठान्तर्गत-पदानाम् समस्तपदम् विग्रहवाक्यम् वा लिखत –
* प्रदत्त-विग्रहवाक्येषु मूलपदेदृष्ट्वा उपरि प्रदत्त-नियमानुसारम् तयोः मेलनम् कृत्वा समस्तपदम् लिखत |
* एवमेव प्रदत्त-समस्तपदेषु पूर्व-उत्तर-पदे दृष्ट्वा अत्र क: समास: अस्ति ? इति अवगम्य समासानुसारम् विग्रहवाक्यम् लिखत |
* प्रश्नपत्रे सर्वत्र लिंग-विभक्ति-वचनानुसारम् एव उत्तराणि लिखन्तु |

---

**अभ्यासार्थम् पाठ्यपुस्तकात्** C B S E निर्धारित- समास-कार्ये उपर्युक्त- नियमानुसारम् अध: प्रदत्त-विग्रहवाक्यपदानां समस्तपदनि , एवं समस्तपदानाम् विग्रहवाक्यानि च लिखित्वा **उत्तराणि** प्रदत्त-स्थाने लिखत | सहायतार्थम् पाठानुसारम् प्रदत्त-उत्तराणि पश्यन्तु |

*********************

पाठ: - 1 महानगराणाम् मध्ये - ............................ , बाष्पयानमाला - ....................................

जनानाम् ग्रसनम् - ............................ , यानपंक्तय: - ........................................

पुरस्य कलरवम् - ....................... ,वायुमण्डलम् - .....................................

कुत्सितेभ्य: वस्तुभ्य: मिश्रितम् - ............. ,वनदेशम् - .....................................

धराया: तलम् - ..................... , समलम् - ........................................

कुसुमानाम् आवलि: - ...................... , समीरचलिता - ...................................

जीवितस्य रसम् तस्य हरणम् - ............... , खगकुलम् - ..................................

लता: च तरव: च गुल्मा: च - ................... , मानवजीवनम् - ...........................

जीवित: मरणम् - ................... , प्रस्तरतले - ................................

******************************

**उत्तराणि :-** महानगरमध्ये , बाष्पयानानां माला , जनग्रसनम् , यानानाम् पंक्तय: , पुरकलरवम् , वायो: मण्डलम् ,कुत्सितवस्तुमिश्रितम् , वनस्य देशम् , धरातलम् , मलेन सहितम् , कुसुमावलि: , समीरेण चलिता ,वितरसहरणम् , खगानाम् कुलम् , लतातरुगुल्मा: , मानवस्य जीवनम् , जीवन्मरणम् , प्रस्तरस्य तले |

---

पाठ: - 2 पुत्रद्वयेन उपेता - ......................... , राजपुत्र: - ....................................

गले बद्ध: शृगाल: यस्य स: - .................... , प्रत्युत्पन्नमति: - .............................

जम्बुकेन कृत: उत्साह: , तस्मात् - ............. ,भयाकुलचित्त: - ............................

गृहीतं करे जीवितं येन स: - ......................................... |

******************************

**उत्तराणि** :- पुत्रद्वयोपेता , राज्ञ: पुत्र: , गलबद्धशृगाल: , प्रत्युत्पन्ना मति: यस्य स: , जम्बुककृतोत्साहात् ,

भयेन आकुलं चित्तं यस्य सः , गृहीतकरजीवितः |

---

पाठः - 3 देहस्य सुखम् - ........................ , शरीरयासजननम् - ...........................................

दोषस्य अभावः - ........................... ,शरीरोपचयः - ..............................................

स्निग्धं भुज्यन्ते ये तेषां - .................. ,शीतवसन्तयोः - .........................................

आत्मनः हितैषिभिः - ................... , हृदिस्थानास्थितः - ...................................

देशः च कालः च अशनं च - ........... , वयोबलशरीराणि - ..................................

*******************************

**उत्तराणि** :- देहसुखम् , शरीरस्य आयासजननम् ,निर्दोषम् ,शरीरस्य उपचयः, स्निग्धभोजिनाम् ,शीते च वसन्ते च , आत्महितैषिभिः ,हृदि स्थाने आस्थितः,देशकालशनानि , वयः च बलं च शरीरं च ,

पाठः - 4 सिंहासने स्थः - ............................. , तापसी च तापसः च - .....................................

कुशः च लवः च - .................... , उपरामम् - .................................................

युवयोः दर्शनम् - ................ , कुशलप्रश्नभाजनम् - .......................................

हृदयं गृह्णाति यः सः - ......... , आसनार्धम् - ..............................................

व्यवधानेन सहितम् - ............. , चारित्रलोपाय - .......................................

पशुपतेः मस्तकम् - .................. ,सूर्यचन्द्रयोः - .......................................

क्षत्रियाणाम् कुलः - ................... , गुरुचरणम् - ...........................................

वचनं वचनं प्रति - .................... , शरीरसन्निवेशः - ....................................

आर्यस्य वन्दनायाम् - .................. , दारकौ - ..............................................

तपसे वाने - ............................ ,प्रकृतिस्था - ..........................................

रामस्य अयनम् - ....................... , कुटुम्बवृत्तान्तः - .......................................

उपाध्यायस्य दूतः - .................................... , व्रतनिधिः - ........................................

सरस्वत्याः अवतारः - .................................. ,सभासदः - .....................................

***************************************

उत्तराणि :- सिंहासनस्थः , तापसौ ,कुशलवौ , रामस्य समीपम् , युष्मद्दर्शनम्, कुशलप्रश्नस्य भाजनम् ,

हृदयग्राही , आसनस्य अर्धम् , सव्यवधानम् , चारित्रस्य लोपाय , पशुपतिमस्तकम् ,सूर्यः च चन्द्रः च , तयोः ;क्षत्रियकुलः , गुरोः चरणम् , प्रतिवचनम् , शरीरस्य सन्निवेशः,आर्यवन्दनायाम् , दरकः च दारकः च ,तपोवने ,प्रकृतौ स्थिता या सा ,रामायणम् , कुटुम्बस्य वृत्तान्तः , उपाध्यायदूतः , व्रतस्य निधिः ,सरस्वत्यवतारः ,सभायाः सदः (सभ्यः ) |

---

पाठः - 5 बलीवर्दः च बलीवर्दः च , तयोः - ...................... , बलीवर्दाभ्याम् - ...........................

सहस्रात् अधिकम् , तेषु - .................................. ,सुरभिवचनम् - ................................

तुल्यम् वात्सल्यम् यस्याः सा - ............................ ,मेघरवैः - ....................................

जलस्य उपप्लवः - ............................................ , हर्षातिरेकेण - .................................

पुत्राणाम् सहस्रम् - .......................................... , कृपार्द्रहृदया - ...............................

**************************************

उत्तराणि :- बलीवर्दयोः , बलीवर्दः च बलीवर्दः च ताभ्याम् ,सहस्राधिकेषु , सुरभेः वचनम् , तुल्यवत्सला , मेघानां रवैः , जलोपप्लवः , हर्षस्य अतिरेकेण , पुत्रसहस्रम् , कृपया आर्द्रम् हृदयम् यस्याः सा |

---

पाठः - 6 शरीरे स्थितः - .................................... , निर्गुणम् - .........................................

बलस्य अभावः - ................................... , अकारणद्वेषिमनः - ................................

देहे स्थितः - .............................................. ,काष्ठगतः - .....................................

देहस्य विनाशाय- ......................................... , भारवहने - ......................................

************************************

**उत्तराणि** :- शरीरस्थः , गुणानाम् अभावः , निर्बलः , अकारणद्वेषि मनः यस्य सः ,देहस्थितः , काष्ठे गतः , देहविनाशाय , भारस्य वहने ,

---

पाठः -7 हर्षेण मिश्रितम् - ........................................ , वनराजः - .........................................

पञ्चतन्त्रस्य उक्तिः - .................................... ,पक्षिसम्राट् - ....................................

विशालः कायः यस्य सः - ............................... , परभृत् - .......................................

स्थिता प्रज्ञा यस्य सः - .................................. , साट्टहासम् - ..................................

रक्षायाः उपायान् - ...................................... , ध्यानमग्नः - ..................................

जलं धीयते यसमिन् तस्मिन् - ....................... , सगर्वम् - ....................................

नृत्यस्य मुद्रायाम् - ..................................... , व्याघ्रचित्रकौ - ................................

नद्याः जलम् - .......................................... , वनराजपदाय - ..................................

नृपस्य अभिषेकः - ..................................... , यथासमयम् - ...................................

स्नेहेन सहितम् - ........................................ , प्रजासुखे - .......................................

*******************************

**उत्तराणि** :- हर्षमिश्रितम् ,वनस्य राजः , पञ्चतन्त्रोक्तिः ,पक्षिणाम् सम्राट् , विशालकायः , परैः भृत् , स्थितप्रज्ञः अट्टाहासेन सहितम् ,रक्षोपायान् , ध्याने मग्नः ,जलधौ , गर्वेण सहितम् , नृत्यमुद्रायाम् , व्याघ्रः च चित्रकः च , नदीजलम् ,वनराजस्य पदाय , नृपाभिषेकः , समयम् अनतिक्रम्य , सस्नेहम् ,प्रजायाः सूखे |

पाठः- 8 निशायाः अन्धकारे - ................................ , दैवगतिः - .....................................

कृशः कायः यस्य सः - ................................ , काष्ठपटले - ....................................

सम्मानेन सहितम् - ................................ , पादध्वनिना - ................................

**********************************

**उत्तराणि** :- निशान्धकारे , दैवस्य गतिः , कृशकायः , काष्ठस्य पटले ,ससम्मानम् , पादानाम् ध्वनिना |

---

पाठः-9 तस्य कृतज्ञता - .................................. , विमूढधीः - ..........................................

तत्वार्थस्य निर्णयः - ............................. ,वाक्पटुः - ............................................

आत्मनः श्रेयः - .................................. , विद्वद्वचः - ..........................................

*************************************

उत्तराणि :- तत्कृतज्ञता , विमूढा धीः यस्य सः (मूर्खः) ,तत्वार्थनिर्णयः ,वाचि पटुः ,आत्मश्रेयः , विदुषां वचः |

---

पाठः-11 हर्षेण सहितम् - ................................. , अस्मद्गृहे - ............................................

गृहस्य जनम् - .................................. , तत्प्रतीकारः - ........................................

**********************************

उत्तराणि :- सहर्षम् , अस्माकं गृहे , गृहजनम् ,तस्य प्रतीकारः |

---

अभ्यासार्थम् :-**अधोलिखितेषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त-विकल्पेभ्यः चित्वा लिखत -**

**( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

क) **बाष्पमाला** संधावति | बाष्पयानेषु माला / बाष्पयानेभ्यः माला / बाष्पमालानां माला

ख) किं द्वायोरप्येकमेव **प्रतिवचनम्|** वचने वचने प्रति / वचनं वचनं प्रति / वचनात् वचनात् प्रति

ग) तत्र राजसिंहः नाम **राजपुत्रः** वसति स्म | राज्ञः पुत्रः / राज्ञा पुत्रः / राज्ञे पुत्रः

घ) तस्मिन्नेव काले **व्याघ्रचित्रकौ** अपि जलपानाय आगतौ |

व्याघ्रः च चित्रकः च / व्याघ्रः च चित्रकाः च / व्याघ्रः च चित्रकौ च

ङ) गुणं न वेत्ति **निर्गताः गुणाः यस्मात् सः**|निर्गतगुणाः / निरगतगुणः / निर्गतगुणानाम्

---

**Q.No. 7.**अधोलिखित – वाक्येषु रेखांकितपदानां **प्रकृति – प्रत्ययौ** संयोज्य विभज्या वा उचितम् उत्तरम् विकल्पेभ्यः चित्वा लिखत – **( केवेलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

**पाठ्यबिन्दूनां विवरणम् उदाहरणानि च :-**

* प्रत्ययान्तपदानि विशेषणपदानि इव प्रयुज्यन्ते |

* प्रत्ययान्त-पदस्य प्रयोगः वाक्ये विद्यमानस्य विशेष्यपदस्य लिंग-विभक्ति-वाचनानुसारम् भवति |

* प्रत्ययाः त्रिविधाः भवन्ति | 1) कृत् – प्रत्ययाः ( धातु + प्रत्यय = रूपम् - गम् + क्त = गतः आदि .....)

2) तद्धित-प्रत्यया; ( शब्दः+ प्रत्ययः = रूपम् – बुद्धि + मतुप् = बुद्धिमान्)

3) स्त्री-प्रत्ययाः (पुंलिंग-शब्दः + प्रत्ययः = रूपम् – बालक+ टाप् = बालिका )

**क) तद्धित-प्रत्ययाः -**

1)**मतुप् = युक्तअर्थे** ( प्रत्ययस्य शेषः पदेन सह - वान् …….. / मान् ...... भवति )

* अकारान्त-शब्दैः सह पुंलिंगे - **वान् वन्तौ वन्तः**, स्त्रीलिंगे –**वती वत्यौ वत्यः**, नपुंसके- **वत् वती वन्ति|**

* “अ” भिन्न-अन्य-स्वरान्त-शब्दैः सह –पुं–**मान् मन्तौ मन्तः**,स्त्री –**मती मत्यौ मत्यः**,नपुंस- **मत् मती मन्ति|**

यथा :- धन + मतुप् = पुंलिंगे - धनवान् ( भवत् शब्दवत् रूपाणि ) , स्त्री – धनवती ( नदी शब्दवत् )

शक्ति + मतुप् = पुं – शक्तिमान् ( भवत् शब्दवत् रूपाणि ) , स्त्री – शक्तिमती ( नदी शब्दवत् )

2) **ठक् = सम्बन्ध अर्थे** ( प्रत्ययस्य शेषः पदेन सह “इक” भवति |

* ठक् प्रययस्य प्रयोगे शब्दस्य **प्रथमस्वरे परिवर्तनम्** अपि भवति |

**यथा :- अ = आ , इ / ई / ए = ऐ , उ /ऊ / ओ = औ , ऋ = आर् |**

यथा :- **स**माज + ठक् = **सा**माजिक:/ सामाजिकी / सामाजिकम् – बालक / नदी / पुष्प शब्दवत् रूपाणि )

3) **त्व = धर्म ( = समूहार्थे )** (प्रत्ययस्य शेष: पदेन सह " त्वम् " भवति |पुष्प-नपुंसकलिंगवत् रूपाणि भवन्ति |

यथा :- मानव + त्व = मानवत्वम् , महत् + त्व = महत्त्वम् , पशु + त्व = पशुत्वम् |

4) **तल् = धर्म ( = समूहार्थे )** (प्रत्ययस्य शेष: पदेन सह " ता" भवति | लता-स्त्रीलिंगवत् रूपाणि भवन्ति |

यथा :- मानव + तल् = मानवता , क्रूर + तल् = क्रूरता |

**ख) स्त्री-प्रत्ययौ -**

1) **टाप्** ( प्रत्ययस्य शेष: पदेन सह " **आ** " भवति |

* अक-अन्त-पुंलिंग-शब्दानाम् कृते "**इका**" भवति |लतावत् रूपाणि भवन्ति |

यथा :- बाल + टाप् = बाला , बालक + टाप् = बालिका , मूषक + टाप् = मूषिका |

2) **ङीप्** ( प्रत्ययस्य शेष: पदेन सह**"ई"** भवति | नदीवत् रूपाणि भवन्ति |

यथा :- नद + ङीप् = नदी , मुख + ङीप् = मुखी |

*********************************

**अभ्यासार्थम् :- उपर्युक्त-विवरणानुसारम् :-**

**Q.**अधोलिखित – वाक्येषु रेखांकितपदानां **प्रकृति – प्रत्ययौ** संयोज्य विभज्या वा उचितम् उत्तरं लिखत –

( परीक्षायां विकल्पा: दीयन्ते ,अभ्यासवशात् अत्र न दत्ता: ) |**( केवेलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**


1) यथासमयं सर्वेषां **महत्त्वम्** विद्यते | ……………… + ..................
2) विद्वांस एव अस्मिन् लोके **चक्षुष्मन्त:** प्रकीर्तिता: | .................... + ..................
3) वयं भवताम् **हृद् + ठक्** स्वागतं कूर्म: | .................................
4) **समता** सदैव पालनीया अस्ति | .................... + ..................
5) देशसेवायां सैनिका: **क्षमा + मतुप्** भवन्ति | ................................
6) स्वतन्त्रता अस्माकम् **मूल + ठक्** अधिकार: अस्ति | .................................
7)**श्रद्धा + मतुप्** छात्रा: ज्ञानम् लभन्ते | ................................
8) प्रकृते: **रमणीय + तल्** मनोरमा अस्ति | ..................................
9) सर्वे **सम्पन्नताम्** इच्छन्ति | .................... + ..................
10) अद्य मम **साप्ताहिक:** अवकाश: अस्ति | .................... + ..................
11) हरितरूणाम् ललितलतानाम् माला **रमणीया** | .................... + ..................
12) यत्रास्ते सा **धूर्त + टाप्** तत्र गम्यताम् | ................................
13) पर्वतेभ्य: **नद + ङीप्** प्रवहन्ति | .................................

******************************

**Q.No.8. मञ्जूषायां प्रदत्त-पदै: वाच्य – परिवर्तनम् कृत्वा अधोलिखितम् संवादम् पुन: लिखत - 1 x 3 = 3**

**पाठ्यबिन्दूनां विवरणम् :-**

निम्नलिखित-तालिकावाच्यस्य स्वरूपं स्पष्टीकरोति | पश्याम: -




| **कर्तृवाच्यम्** | | | | **कर्मवाच्यम्** | | |
|---|---|---|---|---|---|---|
| **कर्तृ** | **कर्म** | **क्रिया** | | **कर्तृ** | **कर्म** | **क्रिया** |
| 1 | 2 | 1 TO | 3 | 1 | | 1 |
| प्रथमा-वि | द्वितीया-वि | कर्तृपद-वचनानुसारम् | | तृतीया | प्रथमा | कर्मपद-वचनानुसारम् |
| **प्रथम-पुरुषः -** | | | | | | |
| रामः | फलं | खादति \|To | | रामेण | फलं | खाद्यते \| |
| रमौ | फलानि | खादन्ति \|To | रामाभ्याम् | फलानि | | खाद्यन्ते \| |
| रामाः | फले | खादन्ति \|To | रामैः | फले | | खादयेते \| |
| **मध्यम-पुरुषः -** | | | | | | |
| त्वं | पुस्तकानि | पठसि \| To | त्वया | पुस्तकानि | | पठ्यन्ते \| |
| युवां | पुस्तकं | पठथः \| To | युवाभ्याम् | पुस्तकं | | पठ्यते \| |
| यूयं | पुस्तके | पठथ \| To | युष्माभ्याम् | पुस्तके | | पठ्येते \| |
| **उत्तम-पुरुषः -** | | | | | | |
| अहं | शब्दं | करोमि \|To | मया | शब्दः | | क्रियते \| |
| आवां | ग्रामान् | गच्छावः \|To | आवाभ्यां | ग्रामाः | | गम्यन्ते \| |
| वयं | पत्रे | लिखामः \|To | अस्माभिः | पत्रे | | लिख्येते \| |

ध्यातव्यम् :- **कर्तृपदानि**

| **प्रथमाविभक्तौ** | **तृतीयाविभाक्तौ** |
|---|---|
| 1 | 3 |

| | | | | | | |
|---|---|---|---|---|---|---|
| बालक: | बालकौ | बालका: | To | बालकेन | बालकाभ्याम् | बालकै: |
| स: | तौ | ते | - | तेन | ताभ्याम् | तै: |
| सा | ते | ता: | - | तया | ताभ्याम् | ताभि: |
| कवि: | कवी | कवय: | - | कविना | कविभ्याम् | कविभि: |
| त्वं | युवां | यूयम् | - | त्वया | युवाभ्याम् | युष्माभि: |
| अहं | आवां | वयं | - | मया | आवाभ्यां | अस्माभि: |

**कर्मपदानि**

| द्वितीयाविभाक्तौ 2 | | | | प्रथमाविभक्तौ 1 | | |
|---|---|---|---|---|---|---|
| पाठं | पाठौ | पाठान् | - | पाठ: | पाठौ | पाठा: |
| विद्यालयं | विद्यालयौ | विद्यालयान् | - | विद्यालय: | विद्यालयौ | विद्यालया: |
| ग्रामं | ग्रामौ | ग्रामान् | - | ग्राम: | ग्रामौ | ग्रामा: |
| गीतं | गीते | गीतानि | - | गीतं | गीते | गीतानि |
| तं | तौ | तान् | - | स: | तौ | ते |
| शिष्यम् | शिष्यौ | शिष्यान् | - | शिष्य: | शिष्यौ | शिष्या: |
| त्वां | युवां | युषमान् | - | त्वं | युवां | यूयं |
| मां | आवां | अस्मान् | - | अहं | आवां | वयं |

**क्रियापदानि**

| कर्तृपदस्य वचन-अनुसारम् 1 | | | | कर्मपदस्य वचन-अनुसारम् 1 | | |
|---|---|---|---|---|---|---|
| पठति | पठत: | पठन्ति | - | पठ्यते | पठ्येते | पठ्यन्ते |
| गायति | गायत: | गायन्ति | - | गीयते | गीयेते | गीयन्ते |
| करोति | कुरुत: | कुर्वन्ति | - | क्रियते | क्रियेते | क्रियन्ते |
| पिबति | पिबत: | पिबन्ति | - | पीयते | पीयेते | पीयन्ते |

ध्यातव्यम् :- **सामान्य-अवबोधनाय:- * प्रत्ययान्तपदानि ( क्रियापदानि )**

| क्तवतु – कर्तृवाच्ये | | | | क्त – कर्मवाच्ये | | |
|---|---|---|---|---|---|---|
| स: | पाठं | लिखितवान् \| | - | तेन | पाठ: | लिखित: \| |
| बालिका | ग्रामं | गतवती \| | - | बालिकया | ग्राम: | गत: \| |
| जना: | व्यायामं | कृतवन्त: \| | - | जनै: | व्यायाम: | कृत: \| |
| अहं | पत्रम् | प्राप्तवान् \| | - | मया | पत्रम् | प्राप्तम् \| |

***************************

**अभ्यासार्थम् उदाहरणानि : -**

* परीक्षायां प्रदत्तानि वाक्यानि कर्तृ-कर्म-क्रिया-पदै: कर्तृवाच्यम् वा , कर्मवाच्यम् वा इति उपर्युक्त-विवरणानुसारम् अवगच्छन्तु |

* मञ्जूषात: वाच्यानुसारम् कर्तृ / कर्म / क्रिया / पदानि अवगच्छन्तु |

* तत: अधोलिखित - तालिकाया: आधारेण मञ्जूषात: उचितं पदं चित्वा रिक्तस्थानानि पूरयत |

यथा :-

| संख्या | वाक्यम् | वाच्यम् | सहायकपदम् | उत्तरम् |
|---|---|---|---|---|



KVS

| | | | | |
|---|---|---|---|---|
| 1 | आचार्यैः ........................ पाठ्यन्ते। | कर्म | कर्मपदम् | शिष्याः |
| 2 | शिष्यैः अध्यापकः ............... । | कर्म | क्रियापदम् | नम्यते |
| 3 | ................. कथा श्रूयते । | कर्म | कर्तृपदम् | सर्वैः |

**मञ्जूषा** :- नम्यते , सर्वैः , शिष्याः।

***********************

**अभ्यासाय :-**

* मञ्जूषायां प्रदत्त-पदैः वाच्य – परिवर्तनम् कृत्वा अधोलिखितम् संवादम् पुनः लिखत -1x 3 = 3

लता :- गीते ! किं त्वया प्रदर्शिनी ........................... ।

गीता :- आम् । ............... प्रदर्शिनीम् एव द्रष्टुम् गच्छामि ।

लता :- किं त्वं दशमी कक्षायाः वार्षीक-परीक्षाम् लिखसि ?

गीता :- आम् । मया दशमी कक्षायाः ........................ लिख्यते ।

**मञ्जूषा :- अहं , परीक्षा , दृश्यते ।**

******************

<u>**सूचना**</u>:- * यदि उपरि वाच्याधारित – प्रश्ने कोऽपि सन्देहः अस्ति

तर्हि अधः प्रदत्तविकल्प-प्रश्नस्य उत्तराणि अपि लिखन्तु , अनेन पूर्णांकान् प्राप्तुम् अवकाशः भवति ।

* नियमाः उपरिवत् एव ।

**अथवा**

**अधोलिखितानाम् वाक्यानाम् वाच्यपरिवर्तनम् कुरुत - ( केवलं प्रश्नत्रयम् ) 1 x 3 =3**

*** प्रदत्त-वाक्यम् कर्तृवाच्ये अस्ति वा कर्मवाच्ये अस्ति वा इति प्रथमं अवगच्छन्तु ।**

*** ततः उपर्युक्त-विवरणानुसारम् वाच्य-परिवर्तनम् कुर्वन्तु ।**

**1) गोपालः पत्रम् लिखति ।**

**2) त्वया कार्याणि क्रियन्ते ।**

**3) त्वं पुष्पाणि नयसि ।**

**4) बालिकया दुग्धम् पीयते ।**

**5) छात्रौ फलानि खादतः ।**

******************************

**Q.No.9. अधोलिखित–वाक्येषु प्रदत्त-समयं कालबोधक-शब्दैः पूरयत / लिखत –**

**( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

**पाठ्यबिन्दूनां विवरणम् :-**

**सामान्य-अवबोध एव**। एतेषामुपरि ध्यानम् यच्छन्तु ।

**ध्यातव्यम् :- 01 : 15 – सपाद-एकवादनम् , 01 : 30 – सार्ध-एकवादनम् , 01 : 45 – पादोन द्वि-वादनम्**

**उदाहरणानि :-**

1) अहं **( 07 : 15 ) सपाद सप्तवादने**विद्यालयं गच्छामि ।

2) अहं **( 08 : 30 ) सार्ध-अष्टवादने** प्रार्थनाम् करोमि ।

3) अहं **( 11 : 45 ) पादोन द्वादशवादने** भोजनम् करोमि |

4) अहं **( 03 : 00 ) त्रिवादने** गृहम् आगच्छामि |

********************************

**कालबोधक-शब्दै: पूरयत - अभ्यासाय :- उताराणि स्वयमेव प्रदत्त-स्थाने लिखन्तु -**

| | | | |
|---|---|---|---|
| 01:00- एकवादनम् | 01:15- सपाद-एकवादनम् | 01:30 - सार्ध-एकवादनम् | 01:45 – पादोन-द्विवादनम् |
| 02:00- द्विवादनम् | 02:15- ....................... | 02:30- ....................... | 02:45- ......................... |
| 03:00- त्रिवादनम् | 03:15- ........................ | 03:30- ...................... | 03:45 - ........................ |
| 04:00-चतुर्वादनम् | 04:15- ........................ | 04:30-...................... | 04:45-........................ |
| 05:00-पञ्चवादनम् | 05:15-......................... | 05:30-........................ | 05:45-........................ |
| 06:00-षड्-वादनम् | 06:15-........................ | 06:30-........................ | 06:45-........................ |
| 07:00-सप्तवादनम् | 07:15- ......................... | 07:30 - ...................... | 07:45- ....................... |
| 08:00- अष्ट-वादनम् | 08:15-........................... | 08:30-........................ | 08:45- पादोन-नव-वादनम् |
| 09:00- ................ | 09:15-........................... | 09:30-........................ | 09:45-........................ |
| 10:00-................. | 10:15-सपाद-दशवादनम् | 10:30- ...................... | 10:45-......................... |
| 11:00- एकादशवादनम् | 11:15-......................... | 11:30- ...................... | 11:45- ......................... |
| 12:00- .................. | 12:15-......................... | 12:30-...................... | 12:45- पादोन-एकवादनम् |

*******************************

**अभ्यासार्थम् :-**

**Q.अधोलिखित – वाक्येषु प्रदत्त-समयं कालबोधक-शब्दै: पूरयत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

1) प्रत: ( 10:15 ) ............................................... दीपप्रज्वलनम् भवति |

2) प्रात: ( 10:30 ) .............................................. श्लोक-प्रतियोगिताया: उद्घाटनम् |

3) (12:45 ) ...................................................... निर्णयस्य घोषणा |

4) ( 1:00 ) ....................................................... पुरस्कारवितरणम् धन्यवादज्ञापनं च |

5) अहं ( 4 : 45 ) .................................................... मित्रस्य गृहं गच्छामि |

*************************

**Q.No.10. मञ्जूषायां प्रदत्त-उचितै: अव्ययपदै: अधोलिखित-वाक्येषु रिक्तस्थानानि पूरयत -**

**( केवलं प्रश्नषट्कम् ) ½x 6=3**

**पाठ्यबिन्दूनां विवरणम् उदाहरणानि च :-**

**" लिंग-विभक्ति-वचन-शून्यानि अव्यायानि "**अर्थात् :- सदा - एक: शब्द: एक: अर्थ: |

C B S E द्वारा प्रदत्त-24 अव्ययपदानाम् क: अर्थ: ? इति अवगच्छन्तु | उदाहरणै: प्रयोगमपि जानन्तु |

| **अव्ययम्** | **= अर्थ:** | **वाक्ये प्रयोग:** |
|---|---|---|
| 1. उच्चै: | = जोर से, ऊंचे | * छात्र: ................ श्लोकं पठति \| शिशु: ................ रुदति \| |
| 2. च | = और | * राम: कृष्ण: ......... गच्छत: \| स: पत्रम् पुष्पम् ......... नयति \| |
| 3. श्व: | = आनेवाला कल | * मम पिता .......... विद्यालयं आगमिष्यति \| ........ क: वासर: भविष्यति? |
| 4. ह्य: | = बीता हुआ कल | * नगरे .......... वर्षा अभवत् \| .......... क: वासर: आसीत् ? |
| 5. अद्य | = आज | * ……….. अहं मन्दिरं गच्छामि \|......... क: वासर: अस्ति ? |
| 6. अत्र | = यहां | * बाला: ............ कोलाहलं कुर्वन्ति \| माता ........... किं करोति ? |
| 7. तत्र | = वहां | * दूरे ............... वृक्षा: दृश्यन्ते \|............. के क्रीडन्ति ? |
| 8. यत्र | = जहां | * ........... जलं अस्ति तत्र जीवनम् भवति \|.... मन्दिरं तत्र भकता \| |
| 9. कुत्र | = कहां | * तव गृहं ................ अस्ति ? छात्रा: ............ क्रीडन्ति ? |
| 10. इदानीम् | = अब | * ........................ त्वं किं करोषि ?……….. अहं लिखामि \| |
| 11. अधुना | = अब | * ................... भवान् कुत्र गच्छति ? स: ................. पाठं पठति \| |
| 12. सम्प्रति | = अब | * गज: .............. किं करोति ? सा ................. दूरदर्शनम् पश्यति \| |
| 13. साम्प्रतम् | = अब | * त्वं ................. ग्रामं गच्छ \| माता ........................... पचति \| |
| 14. यदा | = जब | * .................. सूर्य: आगच्छति तदा प्रकाश: भवति \| |
| 15. तदा | = तब | * यदा पिता आगच्छति ..................... पुत्र: पठति \| |
| 16. कदा | = कब | * जना: ...........मम् कुर्वन्ति ? कोकिल: ................ कूजति ? |
| 17. सहसा | = अचानक | * .................अविचार्य कार्यं न कुर्वीत \| ................ वर्षा भवति \| |
| 18. वृथा | = व्यर्थ / बेकार | * समुद्रे वर्षा ............. भवति \| लोके ............. किमपि नास्ति |
| 19. शनै: | = धीरे | * गज: .............. चलति \| शिशु: ................... खादति \| |
| 20. अपि | = भी | * स: क्रीडति अहम् ......... क्रीडामि \| सूर्य: शोभते चन्द्र: .............. \| |
| 21. कुत: | = कहां से | * नद्य: ...............प्रवहन्ति ? फलं ...................... पतति ? |
| 22. इतस्तत: | = इधर उधर | * छात्रा: ............... भ्रमन्ति \| वानरा: ...................... कूर्दन्ति \| |
| 23. यदि | = अगर | * जन: ................. प्रयत्नम् करोति तर्हि फलं प्राप्नोति \| |
| 24. तर्हि | = तो | * यदि छात्र: सम्यक् पठति .......... प्रथम-श्रेण्याम् उत्तीर्ण: भविष्यति \| |

*******************************

**अभ्यासार्थम् :-**

**मञ्जूषायां प्रदत्त-उचित-अव्यय-पदै: अधोलिखित-वाक्येषु रिक्तस्थानानि पूरयत ( केवलं प्रश्नषट्कम् ) ½x 6=3**

मोहन: :- रमेश ! त्वं गृहात् ...................... गच्छ |

रमेश: :- अहं त्वां गुरु: ........................... मन्ये |

मोहन: :- त्वं .............................. एतत् कथयसि ?

रमेश: :- ................... रात्रि: अस्ति | तमसि बहि: ...............गन्तव्यम् |

मोहन: :- अहं तु .......................... न त्रस्यामि अत: त्वया सह गमीष्यामि |

**मञ्जूषा :- किमर्थम् , संप्रति , बहि: , इति , कदापि , मा |**

**********************************

**Q.No.11. अधोलिखित-वाक्येषु रेखांकितम् पदम् अशुद्धम् अस्ति | शुद्धम् पदं विकल्पेभ्य: चित्वा लिखत -**

**( केवलं प्रश्नत्रयम् ) 1 x 3 = 3**

**पाठ्यबिन्दूनां विवरणम् उदाहरणानि च :-**

**अशुद्धि-संशोधनम् :- कथं करणीयम् ?**

**निम्नलिखित-ध्यातव्य-सामान्य –विषयाणां अवलोकनं अभ्यासं च कुर्म: |**

* लिंग , पुरुष ,वचन ,लकार – दृष्ट्या रेखांकित-पद-संशोधनम् करणीयम् |

* प्रत्येकस्मिन् वाक्ये अशुद्ध-पद-संशोधनाय सहायक-पदम् भवति |

* सहायकपदस्य आधारेण वचन / लिंग / पुरुष / लकार – दृष्ट्या च वाक्यस्य संशोधनम् करणीयम् |

**लिंग , पुरुष , वचन – दृष्ट्या सहायक-तालिका**

| | | कर्तृपदम् | | | क्रियापदम् | | |
|---|---|---|---|---|---|---|---|
| **लिंग:** | **पुरुष:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **क्रियापदस्य लट्-प्रत्यया:** | | |
| **पुं** | **प्रथम** | स: / बाल: | तौ / बालौ | ते / बाला: | लिखति | त: | अन्ति |
| **स्त्री** | **प्रथम** | सा / लता | ते / लाते | ता: / लता; | नृत्यति | त: | अन्ति |
| **नपुं** | **प्रथम** | तत् / पुष्पम् | ते / पुष्पे | तानि / पुष्पाणि | विकसति | त: | अन्ति |
| **त्रिषु** | **मध्यम** | त्वं | युवां | यूयं | पश्यसि | थ: | थ |
| **त्रिषु** | **उत्तम** | अहं | आवां | वयं | वदामि | आव: | आम: |

****************************

**उदाहरणानि :-**

**लिंग-दृष्ट्या** :- <u>**स:**</u> बालिका वृक्षम् सिञ्चति | ( सहायक-पदम् - बालिका )

**सा**बालिका वृक्षम् सिञ्चति |

**पुरुष-दृष्ट्या** :- यूयं संस्कृतम् <u>**लिखन्ति**</u>| ( सहायक-पदम् - कर्तृपदं यूयम् , मध्यमपुरुष-बहुवचनम् अस्ति )

यूयं संस्कृतम् **लिखथ**|

**वचन-दृष्ट्या** :- <u>**वयं**</u> सदा सत्यं वदामि |(सहायकपदम् –क्रियापदं वदामि उत्तमपुरुष-एकवचनम् अस्ति )

**अहं** सदा सत्यम् वदामि |

**लकार– दृष्ट्या सहायक-अव्यय-पदानि -**

*** लकार – दृष्ट्या क्रियापद-संशोधनाय सहायक-अव्ययपदानि भवन्ति |**

*** तेषाम् अव्ययानाम् आधारेण एव क्रियापद-संशोधनं भवेत् |**

* वाक्ये **“ ह्य: ”** इति अव्ययस्य आधारेण अशुद्ध-क्रियापदस्य संशोधनं **लङ्** लकारे भवति |

यथा :- छात्र: **ह्य:** विद्यालयं न **गमिष्यति**| छात्र: **ह्य:** विद्यालयं न **अगच्छत्** |

* वाक्ये **" श्व: "** इति अव्ययस्य आधारेण अशुद्ध-क्रियापदस्य संशोधनं **लृट्** लकारे भवति |

यथा :- छात्र: **श्व:** विद्यालयं न **अगच्छत्** | छात्र: **श्व:** विद्यालयं न **गमिष्यति** |

* वाक्ये " **अद्य** " इति अव्ययस्य आधारेण अशुद्ध-क्रियापदस्य संशोधनं **लट्** लकारे भवति |

यथा :- छात्र: **अद्य** विद्यालयं **अगच्छत् |** छात्र: **अद्य** विद्यालयं **आगच्छति** |

***********************

**अभ्यासार्थम् :-**

**अधोलिखित-वाक्येषु रेखांकितम् पदम् अशुद्धम् अस्ति | शुद्धम् पदं विकल्पेभ्य: चित्वा लिखत -**

**( परीक्षायां विकल्पपदानि दीयन्ते अवगमनाय अत्र न दत्ता: )( केवलं प्रश्नत्रयम् ) 1 x 3 = 3**

1) तौ किं **लिखन्ति**| ..........................................................

2) वयं पुष्पोत्सवं **पश्यन्ति**| ..........................................................

3) मे बहूनि **अपत्या:** सन्ति | ..........................................................

4) मम पिता श्व: दिल्लीम् **अगच्छत्**| ..................................................

अत्र अशुद्ध-पद-संशोधनाय सहायक-पदम् कथमुपकरोति इति तालिका-माध्यमेन पश्याम: :-

| संख्या | अशुद्धपदम् | दृष्ट्या | सहायक-पदम् | उत्तरम् |
|---|---|---|---|---|
| 1 | लिखन्ति | वचन | तौ ( द्विवचनम् ) | लिखत: |
| 2 | पश्यन्ति | पुरुष | वयं ( उत्तम-पुरुष ) | पश्याम: |
| 3 | अपत्या: | लिंग | बहूनि ( नपुंसकम् ) | अपत्यानि |
| 4 | अगच्छत् | लकार | श्व: ( लृट् ) | गमीष्यति |

************************

**अभ्यासार्थम् :-**

**Q.अधोलिखित-वाक्येषु रेखांकितम् पदम् अशुद्धम् अस्ति | शुद्धम् पदं विकल्पेभ्य: चित्वा लिखत -**

**( केवलं प्रश्नत्रयम् ) 1 x 3 = 3**

क) माता भोजनं पचन्ति | ( पचसि / पचामि / पचति )

ख) केशव: ह्य: पुस्तकालयं गमीष्यति | ( अगच्छ: / अगच्छत् / अगच्छम् )

ग) उद्याने सुन्दरा: पुष्पाणि दृश्यन्ते | ( सुन्दरम् / सुन्दराणि / सुन्दरे )

घ) युवां कदा गृहकार्यम् कुर्वन्ति | ( कुरुथ: / करोमि / करोषि )

